ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैवच ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥
नीराजनं नीराजयामि विघ्नेशादिदेवताभ्यो नमः ॥

- **अन्य आरती :**
- यसपुस्तकको अन्त्यमा छ ।
- आरती भूमिमा राखेर कपूर बाल्नेः

कर्पूरगौरं करुणावतारं संसारसारम् भुजगेन्द्रहारम् ।
सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

- यसपछि कर्मपात्राको जल बलेको आरतिको वरिपरि घुमाउने :

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्तु प्रदक्षिणा पदे पदे ॥

- **आरतीमा अर्घ्य चढाउनेः**

जातो दैत्य वदार्थाय देवानां पालनाय च ।
तस्मै सत्वाय देवाय निर्गुणाय गुणात्मने ॥
व्यक्ताव्यक्त स्वरूपाय हृशिकपतये नमः ।
गृहाणार्घ्यं मयादत्तं उमया सहितो हरः ॥

- **पुष्पाञ्जलीः**

पुष्पाञ्जलीका लागि पुष्पलिएर हात जोड्नेः

- **वैदिक मन्त्र :**

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

➢ पौराणि श्लोक :

गणपतिः

- गजाननं भूतगणाधिसेवितं
  कपित्थजम्बुफलचारु भक्षणं
  उमासुतं शोकविनासकारकं
  नमामि विघ्नेश्वर पादपङ्कजम् ॥१

- अविरलमदजलनिवहं भ्रमरकुलानेकसेवितकपोलम् ।
  अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥२

- गणाधिप नमस्तेऽस्तु उमापुत्रोऽघनाशनः ।
  विनायकेश पुत्रैति सर्वसिद्धिप्रदायकः ॥ ३

- लम्बोदर नमःतुभ्यं सततं मोदकप्रिय ।
  निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥४

- खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
  प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
  दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
  वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ।५।

सूर्यः

- ध्येयः सदा सवितृमण्डलमध्यवर्ति
  नारायणसरसिजा सनसन्निविष्ट
  केयुरवान् मकरकुण्डलवान् किरीटि
  हारिहिरण्मयवपुर्धतशङ्खचक्रः । १ ।

- तेजोरूप सहश्रांशु सप्ताश्वरथगं वरम् ।

द्विभुजं वरदं पद्मलान्छनं सर्वकामदम् ॥
यस्य हस्ते गदाचक्रो गरुडो यस्य वाहनः ।
शङ्खकरतलेयस्य स मे विष्णु प्रसीदतु ॥ २

देवी

- देविप्रपन्नर्तिहरे प्रसीद प्रसीदमातर्जगतोऽखिलस्य
  प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥१

- नमो देव्यै महादेव्यै शिवायै सततं नमः ।
  नमः प्रकृत्यै भद्रायै नियताप्रणतास्मताम् ॥२

- तव च का किल न स्तुतिरम्बिके! सकलशब्दमयी किल ते तनुः।
  निखिलमूर्तिषु मे भवदन्वयो मनसिजासु बहिःप्रसरासु च ॥
  इति विचिन्त्य शिवे! शमिताशिवे! जगति जातमयत्नवशादिदम्।
  स्तुतिजपार्चनचिन्तनवर्जिता न खलु काचन कालकलास्ति मे ॥३

शिवः

- नमो रुद्राय शान्ताय ब्रह्मणे परमात्मने
  कपर्दिने महेशाय ज्योत्स्नाय महते नमः ।१।
- वन्देदेवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
  वन्देपन्नगभूषणं मृगधरं वन्देपशुनांपतिम्
  वन्दे सूर्यशशाङ्कवह्नि नयनं वन्दे मुकुन्दप्रियं
  वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ।२।
- असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
  सुरतरुवरशाखालेखनीपत्रमूर्वी ।
  लिखति यदि गृहीत्वा शारदा सर्वकालं
  तदपि तव गुणानामीशपारं न याति ।३।
- ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय

कुर्महे । समे कामान् काम कामाय मह्यं कामेश्वरो वै
श्रवणोददातु कुवेराय वैश्रवणाय महाराजाय नमः ।
ॐ स्वस्ती साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं
राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायीस्यात् सार्वभौमः ।
सार्वायुषः आन्तादापरार्धात् । पृथव्यै समुद्रपर्यन्ताया एकराडिति ।
तदप्येषः श्लोको भिगीतो । मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।
आविक्षितस्य कामप्रेर्विश्वेदेवाःसभासद इति ।

विष्णुः

- सशाङ्क चक्रं सकीरिट कुण्डलं सपीत वस्त्रं सरसिरुहेक्षणम् ।
  सहार वक्षस्थल कौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ।१

- शान्ताकार् भुजगशयन् पद्मनाभ् सुरेशं
  विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
  लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
  वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २

राम/कृष्ण :

- ध्येयं सदा परिभवग्नमभीष्ट दोहं
  तीर्थास्पदं शिवविरिञ्चि नुतं शरण्यम् ।
  भृत्यार्तीहं प्रणतपाल भवाब्धिपोतं
  वन्दे महापुरुषते चरणारविन्दम् ॥१

- त्यक्त्वा सुदुस्त्यजसुरेप्सित राज्यलक्ष्मीं
  धर्मिष्ठ आर्यवचसाय दगादरण्यं
  मायामृगं दयितयेप्सितमन्वधावद्
  वन्दे महापुरुषते चरणारविन्दम् ॥२

- नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
  पाणौ महासायकचारूचापं, नमामि रामं रघुवंशनाथम् ॥३

- वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
  शत्रुघ्नो भरतश्च पार्श्वदलयोः वाय्वादि कोणेषु च।
  सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जांबवान्
  मध्ये नील सरोज कोमककरुचिं रामं भजे श्यामककम् ॥४

- इमानि पुष्पाणि मनोहराणि
  सुरासुराणामपि दुर्लभानि ।
  कल्पद्रुमादि द्रुमजानि तानि
  पुष्पाञ्जलीर्मेस्तु सुखाय नित्यम् ॥

पुष्पाञ्जलीपछि पूर्व फर्किएर सूर्यलाई अर्घ्य दिनुपर्छ ।

अर्घ्य दिने मन्त्रः

- नमो विवश्वते ब्रह्मन् ! भाश्वते विष्णु तेजसे ।
  जगत्सवित्रे शुचये सवित्रे कर्म दायिने ॥

- एहि सूर्य ! सहस्रांशो ! तेजोराशे ! जगत्पते ।
  अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकरः ॥

प्रार्थना :

प्रातःस्मरामि खलु तत्सवितुर्वरेण्यं ।
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादि हेतुं
ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥

➢ **सूर्यका १२ नामले** :

ॐ मित्राय नमः ॐ रवये नमः ॐ सूर्याय नमः ॐ भानवे नमः
ॐ खगाय नमः ॐ पुष्णे नमः ॐ हिरण्यगर्भाय नमः
ॐ मरीचये नमः ॐ आदित्याय नमः ॐ सवित्रे नमः

ॐ अर्घाय नमः ॐ भास्कराय नमो नमः ।

➢ **दण्डवत प्रणाम गर्नेः**

भो पाञ्चायन देवा युष्मभ्यं अभिवादयामि ।

क्षमा प्रार्थनाः (**क्षमा मागने**)

- आवाहनं नजानामि, नजानामि तवार्चनम् ।
  पूजांश्चैव नजानामि क्षम्यतां परमेश्वरः॥१
- यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
  तत्सर्वं क्ष्यम्यतां देवा ! प्रसीद परमेश्वरः ॥३

➢ **हातमा जललिने** :

अनेन मया कृता पूजनादि कर्मणा पाञ्चायन देवाः प्रियन्तां न मम ॐ तत्सत् ब्रह्मार्पणमस्तु । जल भुइँमा छोडिदिने ।

➢ **प्रार्थना :**

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ विष्णवे नमः । ॐ विष्णवे नमः । ॐ विष्णवे नमः ।

➢ **चरणोदक लिँदा भन्ने :**

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा पुनर्जन्म न विद्यते ।

➢ **तुलसी मञ्जरी खाने मन्त्र :**

पूजनानन्तरं विष्णोरर्पितं तुलसीदलम् ।
भक्षये देहशुद्ध्यर्थं चान्द्रायणशताधिकम् ॥

व्रतपर्वमा आफैँले पूजा गर्दा :

विशेष व्रत लिँदा वा पर्वमा गुरु नराखी आफैँ अलि लामो पूजा गर्ने हुँदा तलको विधि अपनाउन सकिन्छ :

पूजाका लागि आवश्यक सामग्री

१ जल, जौ, तिल, कुशका टुक्रा राखेर तिलानी बनाएको कचौरा,

२ ठूलो थालमा पञ्चोपचार भनेका पाद्य, अर्घ्य, आचमन, पञ्चामृत र शुद्ध जल क्रमशः राख्नुपर्छ ।

पाद्य पाउधुने जल हो ।

अर्घ्य दही, कुश, जौ, सस्यूँ मिसाएको जल हो । यसपछि(हात धुने जल दिने ।)

आचमन कपूर मिसाएको जल हो ।

पञ्चामृत दूध, दही, घिउ, मह र सख्खर(चिनी)एकै ठाउँमा मिसाएको विशेष परिकार हो ।

शुद्धजल केही नमिसाएको जल हो ।

३. पञ्चामृत स्नानका लागि सासाना कचौरामा :
दूध, दही, घिउ, मह, सख्खर राख्ने ।

४. अर्को थालमा वरिपरि कपडा, सलाई, चन्दन, दुध, दही, घिउ, मह, सख्खर, फूल, दुबो जौ, तिल पुष्प, लावा, जनै, सुपारी आदि,

५ जल राखेको लोहोटा,

६. धूप, दीप, कपूर र नैवेद्य ।

७. कुन देवताको पूजा गर्ने हो उक्त देवताको मूर्ति वा प्रतिमा

८. गणेशलाई २१ सुतेबत्ती, लडडु र दुवो । विष्णुलाई तुलसी मञ्जरी,

९. कपडाः शिवलाई सेतो, विष्णुलाई पहेँलो, गणेश र देवीलाई रातो जोडी–जोडी तयार गर्ने ।

➢ पूजा गर्ने तरिका

सूर्योदयहुनुभन्दा केही अगाडिको समय पारेर स्नान गरी शुद्ध रातो कपडा, भष्म, रुद्राक्ष माला लगाएर **पूर्व वा उत्तर फर्किएर बस्ने गरी आसन बनाउनुपर्छ** र आसन शुद्ध गर्नुपर्छ ।

➢ आसन शुद्धिलाई एउटा कुश लिएर मन्त्र पढ्ने :

ॐ पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ।
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ॥
उक्त कुश बसेको आसन मुनि राख्ने ।

➢ तामा वा काँसको कचौरामा जल, जौ, तिल, कुशका टुक्रा, चन्दन, अक्षता राखेर कर्मपात्रो(तिलानी जल) बनाउने । माथि कर्मपात्र निर्माणमा मन्त्र छन् । तिनै पढ्ने । नआएमा यति गरेपछि त्यो कर्मपात्र बन्छ ।

➢ कर्मपात्रको जलमा तीन कुश डुबाउने :

ॐअपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
उक्त कुशले जल सबैतिर छर्किदिने ।

➢ यसपछि कुश, तील र जौसहितको तिलानीको जल हत्केलामा राखेर सङ्कल्प गर्नेः

अद्येह(आफ्नो गोत्र भन्ने) ...गोत्रोत्पन्न (आफ्नो नाम भन्ने).... पुरुष भए (ब्राह्मणले शर्मा,(क्षत्री भए) वर्मा, र अन्यले वैश्य वा गुप्तोऽहं, (स्त्री भए) देव्यहं मम श्रुतिस्मृतिपुराणोक्त फलप्राप्तये श्रीमत् भगपतप्रीत्यर्थं (पर्वको नाम भन्ने) शुभपुण्य पर्वणि (तिथिको नाम लिने) तिथौ (पूजा गर्ने देवताको नाम) पूजनमहं करिष्ये भनेर भूईंमा छोडिदिने ।

➢ पूजामा राखेको लोहोटाको जललाई छुनेः

गङ्गे च यमुने चैव गोदावरी सरस्वती
नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ।

गङ्गा, यमुना, सरस्वती, गोदावरी, नर्मदा, सिन्धु र काबेरी नदीहरू यही जलमा समाहित भइदिनुहोस् भनेर ढोगिदिने ।

➢ सर्स्युं हातमा राख्ने :

- ॐ अपसर्पन्तु ते भूता ये भूता भूतले स्थिता ।
  ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥१
- अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशं ।
  सर्वेषामवरोधेन पूजाकर्म समारभे ॥२

भन्दै चारैतिर छर्ने ।

➢ शिखाबाँध्ने :

चिद्रुपिणि ! महामाये ! दिव्यतेजः समन्विते
तिष्ठ देवि ! शिखामध्ये तेजोवृद्धिं कुरुष्व मे ।

➢ आचमन गर्ने :

ॐ अच्यूताय नमः ॐ माधवाय नमः
ॐ केशवाय नमः भन्दै तीन पटक आचमन गरी
ॐ गोविन्दाय नमः भन्दै हात धुनुपर्छ ।

➢ पूजाक्रम बुझौं :

आफ्ना अगाडि **बीचमा दीप** राखी त्यसको **दायाँतिर गणेश वायाँतिर कलश राख्नुपर्छ** आफ्नो अगाडि सफा पिर्कामा रातो कपडा विच्छ्याएर आफूले पूजा गर्न लागिएका देवताको प्रतिमा, फोटो जे छ त्यो राख्ने यहाँ उदाहरणका लागि गणेश राखिएको छ त्यसैले गणेश प्रतिमा वा यन्त्र बीचमा राख्नुपर्छ । अगाडिपट्टि दही, दुबो, जौ, कूश, चन्दन र केरा हालेर अर्घ बनाउने र दायाँतिर घण्टी राखेर घण्टी र अर्घमा पूजा गरेपछि घण्टी बजाउँदै कचौराको जल र कुशले दीप

र कलश क्रम पूर्वक वरिपरि घुमाएर एकएक टुक्रा कुश राखिदिनुपर्छ। यसपछि **दीपलाई ॐ दीपाय नमः कलशलाई ॐ कलशस्थ वरुणाय नमः** र गणेशलाई **ॐ गं गणपतये नमः** भनेर पूजा गर्ने पूजामा पञ्चोपचार(पाद्य, अर्घ्य, आचमन, पञ्चामृत, शुद्ध जल चन्दन, अक्षता, पुष्प, धुप, बत्ती, नैवेद्य, जल र फल चढाउनुपर्छ। गणेशको पूजामा दुवो हातमा लिएर गणाधिप नमस्तेऽस्तु उमापुत्रोऽघनाशनः ।
विनायकेश पुत्रैति सर्वसिद्धिप्रदायकः ॥ भनी प्रार्थना गरी चढाउने । यसरी नै
जुन देवताको व्रत लिएको हो । सम्बन्धित देवीदवेतालाई आफ्नो अगाडि राखेर पूजा गर्ने । गणेशको व्रत भएमा

- **उदाहरणमा गणेश पूजा :**
- **गणेशको प्रतिमातिर फर्किएर दुवो, फूलसहित हात जोड्नेः**

गजाननं भूत गणादि सेवितं कपित्थजम्बूफलचारूभक्षणम् ।
उमासुतं शोक विनाशकारकं नमामि विघ्नेश्वर पाद पंकजम् ॥

हे गणाधिप ! उमाशिव पुत्र ! सबै पाप नाश गर्ने सर्वसिद्धि प्रदायक, विनायक गणेश हजुरलाई नमस्कार छ। हातमा लिएको पुष्प चढाउने ।

- **रातो, पहेँलो पुष्प, केशरी, दुबो र अक्षता लिएर फोटो वा प्रतिमा छुँदै १६ पटक ॐ जप गरेर त्यहीँ छोडिदिनुपर्छ।**

- **गणेशमा कुश र जलले आवाहन गर्ने** :

आवाहनं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **कुश राखिदिने** :

आसनं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **पाँच कचौरामा राखेका सामाग्री चढाउनेः**
- **पाउ धुने जल दिने :**

पादयो: पाद्यं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **अर्घ्य चढाउने**:

हस्तयोः अर्घ्यं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **जल चढाउनेः**

मुखे आचनमनीयं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **जलले नुहाइदिने** :

सर्वाङ्गे स्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **शुद्धोदकस्नानः**

शुद्धोदकस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **दूधले नुहाउनेः**

पयः स्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **शुद्धजलले नुहाउनेः**

शुद्धोदकस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **दहीले नुहाइदिनेः**

दधिस्नानं समर्पयामि ॐ ॐ श्रीमन्महागणाधिपतये नमः ।

घिउले नुहाइदिनेः

घृतस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **महले नुहाइदिनेः**

मधुस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **सख्खरले नुहाइदिने** :

शर्करास्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **चन्दन मिसाएको जलले नुहाइदिने**:

गन्धोदक स्नान् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- प**ञ्चामृतले नुहाइदिने**:

पञ्चामृतस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **शुद्ध जलले नुहाउने**:

शुद्धोदकस्नानं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

- **विविध उपकरण चढाउनेः**

- **सुगन्धित तेल लगाइदिने** :
  सुवासितं तैलं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **दुई वटा रातो कपडा ओढाइ दिनेः**
  वस्त्रोपवस्त्रं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **जनै लगाइदिनेः**
  यज्ञोपवितिं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **आचमन जल चढाइदिने**

  यज्ञोपवितान्ते आचमनीयं जलं समर्पयामि ॐ
  श्रीमन्महागणाधिपतये नमः ।
- **चन्दन लगाइदिनेः**
  चन्दनं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **अक्षताको टीका लगाइदिने**ः
  अक्षतां समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **पुष्पको माला लगाइदिनेः**
  पुष्पमालां समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **वेलपात चढाउने**ः
  विल्वपत्रम् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **दुबो चढाउनेः**
  दुर्बाङ्कुरान् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **धुप लगाउने**ः
  धुपं आघ्रापयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **बत्ती सल्काउनेः**
  दीपं दर्शयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **पकाएको चीज र फलफूल(नैवेद्य) चढाउने :**
  नैवेद्यं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।
- **लड्डु चढाउने**ः
  मोदकम् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **सुपारी चढाउनेः**

तांम्बुलं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **फलफूल चढाउने**:

फलं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **समयानुसारको फल चढाउने**:

फलम् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **पैसा चढाउने**:

दक्षिणां समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **जल चढाउने** :

नैवेद्यान्ते आचमनीयं समर्ययामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **२१ सूते बत्ती २१ जोर वा सोभन्दा बढी राखेर आरति गर्ने**:

आरति पूस्तकको पछाडि छ ।

➢ **आरति अर्पण गर्ने** :

अन्त्यमा अरात्रिक्यम् समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

आरति वरिपरि जल घुमाउने र आरति र गणेशमा अर्घ्य चढाउने ।

➢ **पुष्पाञ्जलि लिनेः**

खर्वं स्थुलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारितारिरुधिरैः सिन्दुरशोभाकरम्
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥

जसको शरीर मोटो छ। गजराजसमान मुख र लामो उदर छ। जसका सुन्दरता र बग्दै गरेको मदको सुगन्धको लोभले आएका भमराका कारण गण्डस्थल चञ्चल भएको छ। दाँतका चोटले विदीर्ण भएर शत्रुका रगतले सिन्दुरको शोभा लिएको छ। यस्ता कामनाका दाता पार्वतीपुत्र गणेशजीलाई म वन्दना गर्छु।

पुष्पाञ्जलिं समर्पयामि ॐ श्रीमन्महागणाधिपतये नमः ।

➢ **क्षमा माग्ने :**

आवाहनं नजानामि, नजानामि तवार्चनम् ।
पूजाञ्चैव नजानामि क्षम्यतां परमेश्वरः ।

भन्दै भूईँमा ढोगिदिनुपर्छ ।

अब १०८ पटक **ॐ गं गणपतये नमः** गणेशमन्त्र जप गर्ने ।

➢ **गणेश गायत्री** :

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् ।

➢ पूजाको अन्त्यमा जलप्रसाद ग्रहण गर्नुपर्छ ।

➢ **स्मरणीय कुराः**

माथि गरे जसरी नै शिवको भए माथि **ॐ श्रीमन्महागणाधिपतये नमः** भनेको ठाउँमा **ॐ सदाशिवाय नमः** देवीको भए **देव्यै नमः** नारायण/विष्णुको भए **ॐ विष्णवे नमः ॐ नारायणाय नमः** सत्यनाराउणको भए ॐ रमासहित सत्यनारायणाय नमः भनेर पूजा गर्नुपर्छ। प्रार्थना माथि पाञ्चायनमा दिएकै गर्ने ।

➢ **सम्बन्धित देवताका नाम र जप गर्नका लागि :**

ॐ नमो भगवते वासुदेवाय नमः । ॐ नमः शङ्कराय ॐ ।
ॐ घृणि सूर्याय नमः । ॐ परमतत्वाय शिवशक्तिस्वरुपाय नमःशिवाय । ॐ जगदम्बायै नमः । ॐ हरिहराय नमः । ॐ दुर्गायै नमः ।

ॐ सरस्वत्यै नमः । ॐ नमः शिवाय । ॐ ऐं ह्रीं क्लीं चामुण्डायै नम
: । ॐ उमायै नम : । ॐ विष्णवे नमः । ॐ महालक्ष्म्यै नमः
ॐ अर्द्धनारीश्वराय नमः । ॐ विन्ध्यवासिन्यै नमः । ॐ नवग्रहेभ्यो नम
: ॐ हं हनुमते नमः । ॐ हं पवननन्दनाय नमः । ॐ भैरवाय नमः ।
ॐ भीमसेनाय नमः ।

➢ नवग्रहहरू:

ॐ सूर्याय नमः । ॐ चन्द्राय नमः । ॐ भौमाय नमः
ॐ बुधाय नमः । ॐ वृहस्पतये नमः । ॐ शुक्राय नमः ।
ॐ शनये नमः । ॐ राहवे नमः । ॐ केतवे नमः ।

➢ पूजा गर्दा थाहा पाउनुपर्ने कुराहरू:

घरमा कति मूर्ति स्थापना गर्नुहुन्छ ?

एका मूर्तिर्नसम्पूज्या गृहिणा स्वेष्टमिच्छता ।
अनेकमूर्तिसम्पन्नः सर्वान् कामानवाप्नुयात् ॥

गृहस्थीले एउटामात्र मूर्ति पूज्नुहुँदैन । एकभन्दा अधिक मूर्तिको पूजाले नै कामना पूरा हुन्छन् ।

➢ कुन मूर्ति कतिवटा सम्म पूज्नुहुन्छ ?

गृहे लिङ्गद्वयं नार्च्यं गणेशत्रितयं तथा ।
शङ्खद्वयं तथा सूर्यो नार्च्यौ शक्तित्रयं तथा ॥१
द्वे चक्रे द्वारकायास्तु शालग्रामशिलाद्वयम् ।
तेषां तु पूजनेनैव उद्वेगं प्राप्नुयाद् गृही **॥२** आचारप्रकाश,

घरमा दुई शिवलिङ्ग, तीन गणेश, दुई शङ्ख, दुई सूर्य, तीन देवी, दुई द्वारका चक्र,[१२] दुई शालग्रामलाई एक ठाउँमा राखेर पूजा गर्नु हुँदैन । यदि पूजा गरिन्छ भने उद्वेग अस्थिरता प्राप्त हुन्छ ।

---

[१२] गोमति चक ।

➢ कुन देवताको कति परिक्रमा गर्ने:

एकां विनायके कुर्याद् द्वे सूर्ये तिस्र ईश्वरे ।
चतस्रः केशव कुर्यात्सप्ताश्वत्थे प्रदक्षिणाः ॥
एका चण्ड्याः रवे सप्त तिस्रः कार्या विनायके ।
हरेःचतस्रः कर्त्तव्याः शिवस्यार्ध प्रदक्षिणा ॥
वृषं चण्डं वृषं चैव सोमसूत्र पुनवृर्षम् ।
अपसव्यं यतीनान्तु सव्यन्तु ब्रह्माचारिणाम् ॥
सव्यापसव्यं गृहिणामेवं शम्भोः प्रदक्षिणा ।
सव्यं व्रजेत्तोत्तोऽसव्यं प्रनाल नैव लङ्घयेत् ॥

गणेशको एक वा तीन, सूर्यको दुई वा सात, विष्णुको तीन, केशवको चार, देवी एक, कृष्णको तीन, शिवको आधा परिक्रमा गर्नुपर्छ ।

➢ किन परिक्रमा गर्ने ?

दैवी शक्ति दक्षिणवर्ती हुन्छ त्यसैले दायिने घुम्नुपर्छ ।

➢ पाञ्चायतन देवता स्थापना गर्ने तरिका

ईशानीमारभ्य प्रादक्षण्येन स्थापयेत् ।
यतो व्यत्यययाये हानीकरा भवन्ति ॥ निर्णय सिन्धौ ।

पूजा ईशानकोणबाट प्रारम्भ गरेर दायिने पटिबाट गर्दै लानुपर्छ । यो व्यतिक्रम भयो भने हानिकारक हुन्छ ॥

➢ पाञ्चयतन देव पूजामा चढाउने र चढाउन नमिल्ने पुष्पहरू:

- देवीनामर्कमन्दारौ..वर्जयेत्
  एवं गणेशं तुलसीपत्रैदुर्गां नैवतु दुर्वया ॥
  भगवतीलाई दुवो, अर्क, मन्दार पुष्प अनि गणेशलाई तुतसी पात नचढाउनू ।
- वर्षाऋतुमामात्र कदम्ब र माघमामात्र बकुल शिवलाई चढाउने विधान छ ।

➢ फूलको नाम नजानेमा :

येषां न प्रतिषेधोऽस्ति गन्धवर्णान्विचानि च ।
तानि पुष्पाणि देयानि भानवे लोक भानवे ॥

- कुन चढाउने कुन नचढाउने सबै फूलको नाम थाह नहुँदा शास्त्रले बाधा फुकाउँदै भनेको छः रङ्ग,रूप र सुगन्धयुक्त सबै फूल भगवानमा अर्पित गर्नु तर नाम जानेका पुष्पहरूको भने नियम पूर्वक चढाउन मिल्नेमात्र चढाउनुपर्छ ।

देवता	चढाउन मिल्ने	चढाउन नमिल्ने
गणेश	दुवो आदि सबै फूल	तुलसी
सूर्य	आँक, करवीर आदि अनेक पुष्प	धतुरो, अपराजिता
देवी	श्वेतकमल, रक्तपुष्प आदि अनेक	दुवो, आँक
शिव	विल्वपत्रआदि अनेक पुष्प	कदम्ब सिरिष, कपास अनार, तित्री, बकुल, केतकी, जूही, कुन्द
विष्णु	तुलसीपत्र आदि अनेक पुष्प	आँक, धतुरो, अपराजिता, सिमल, शिरिष, पीप्पल

➢ जन्मोत्सवमा आफैं पूजा गर्दा :

जन्म दिनमा माथि दिएजस्तै दियो कलश गणेश राखी बीचमा एक फलेकमा सेतो कपडा बेरेर बीचबाट पूर्वतर्फ पङ्क्ति मिलाए तीनवटा बीचमा एउटा पश्चिमतिर तीनवटा र बीचबाट उत्तरतिर एक दक्षिणतिर एक सुपारी राखी पूर्वको बीचमा मार्कण्डेय अनि दाँयाँ हुँदै क्रमैले व्यास हनुमान आदि र बीचमा षष्ठीका देवीकोपूजा गर्ने ।

➢ अष्टचिरञ्जीवी को को हुन् ?

अश्वत्थामा, बलिर्व्यासो, हनुमांश्च, विभीषण,

कृप, परशुरामश्च मार्कण्डेयमथाष्टमम् ।

➢ **अष्ट चिरञ्जीविहरू :**

१. मार्कण्डेय २.व्यास, ३.परशुराम, ४.द्रौणि,
५. कृपाचार्य ६.बलि, ७.हनूमान, ८. विभीषण,
प्रह्लाद पनि चिरञ्जीवी मानिन्छन् ।

ॐ अष्टचिरञ्जीविभ्यो नमः ।

➢ बृहस्पति, शुक्र अस्त एवं मलमास र क्षयमासमा गर्न नहुने कुराहरू:

हामीहरूलाई गुरु र शुक्र अस्त हुँदा गर्न नहुने कुराहरू केके होलान् ? जिज्ञाषा भइरहन्छ। यस विषयमा जानकारी होस् भनेर निम्न जानकारी यहाँ राखिएको छ।

वाप्यारामतडागकूपखननारम्भप्रतिष्ठे व्रता
रम्भोत्सर्गवधूप्रवेशनमहादानानि सोमाष्टके।
गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतं
नीलोद्वाहमथातिपन्नशिशुसंस्कारान्सुरस्थापनम ॥
दीक्षामौञ्जीविवाहमुण्डनमपूर्व देवादितीर्थेक्षणं
सन्यासाग्निपरिग्रहौ नृपतिसंदर्शाभिषेकौ गमम।
चातुर्मास्यसमावृती श्रवणयोर्वेधं परीक्षां त्यजेद्
वृद्धशिशुज्यसितयोन्यूनाधिमासे तथा ॥

गुरु, शुक्र अस्त, बाल्य, वृद्धत्व अनि अधिक र क्षयमासमा सार्वजनिक धारा, बगैंचा, तलाउ, कुवा, घर आदिको निर्माण वा प्रतिष्ठा, व्रतहरूको आरम्भ वा उद्यापन, वधूप्रवेश, तुलादि सोह्रदान (महादान), सोम यज्ञ, अष्टक श्राद्ध, पहिलो पटक दारीकपाल काट्ने वा छेवरको काम, नुवाँगी खाने, पौवाशाला, पहिलो पटक श्रावणी कर्म, वेदारम्भ, काम्यकर्म, वृषोत्सर्ग, बालकहरूको अन्नप्राशन, व्रतबन्ध, समावर्तनादि संस्कार कर्म, देवप्रतिष्ठा, मन्त्रदीक्षा ग्रहण, पहिलो पटक कुनै तीर्थादि देवालय दर्शन, सन्यास ग्रहण, अग्निहोत्रकर्मका लागि अग्निसङ्ग्रह, राजाको दर्शन राज्याभिषेक, चातुर्मास पुराण श्रवण, कर्म गर्नु, नाककान छेड्ने काम, परीक्षा लिनुदिने कामहरू अस्त बाल्य र वृद्धत्वमा गर्नु हुँदैन। यसरी नै उक्त कर्महरू नगर्नु भन्ने शास्त्रहरूमा नियम छ।

✠ ✠ ✠

अथर्वशीर्षप्रकरण :

श्रीगणपत्यथर्वशीर्षम्

हरिः ॐ ॥ नमस्ते गणपतये । त्वमेव प्रत्यक्ष तत्त्वमसि । त्वमेव केवलं कासि । त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् ॥१

ऋतं वच्मि । सत्यं वच्मि ॥२

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अव चोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥३

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्ष ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥५

त्वं गुणत्रयातीतः । त्वं कालत्रयातीतः । त्वं देहत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥६

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः।
अर्धेन्दुलसितम् । तारेण रूद्धम् । एतत्तव मनुस्वरूपम् । गकारः
पूर्वरूपम्। अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।
बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः। सैषा गणेशविद्या ।
गणक ऋषिनिचृगायत्री छन्दः । श्रीमहागणपतिर्देवता । ॐ गं गणपतये
नमः ॥।७

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात् ॥ ८

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥
रक्त' लम्बोदरं शूर्पकर्णक रक्तवासम् ।
रक्तगन्धानुलिप्ताङ्ग रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं
जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९

नमो व्रातपतये नमो गणपतये नमः, प्रमथपतये नमस्तेऽस्तु
लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥
१०

एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते।
स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते ।
स पञ्चमहापातकोपपातकात्प्रमुच्यते ।
सायमधीयानो दिवसकृतं । पापं नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायंप्रातः प्रयुञ्जानोऽपापो भवति ।
धर्मार्थकाममोक्ष च विन्दति ॥
इदमथर्वशीर्षमशिष्याय न देयम्।

यो यदि मोहाद्वास्यति स पापीयान्भवति।
सहस्त्रवर्तनाद् यंकाममधीते तं तमनेन साधयेत् ॥११
अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति
स विद्यावान्भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यात् ।
न बिभेति कदाचनेति ॥१२

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति ।

यो लाजैर्यजति स यशोवान्भवति । स मेधावान्भवति ।

यो मोदकसहस्त्रेण यजति स वाञ्छितफलमवाप्नोति ।

यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ १३

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहणे
महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमन्त्रो भवति ।
महाविघ्नात्प्रमुच्यते । महापापात्प्रमुच्यते । महादोषात्प्रमुच्यते । स
सर्वविद्भवति । स सर्वविद्भवति । य एवं वेद ॥१४ इत्युपनिषद् ।

ॐ शान्तिः शान्तिः शान्तिः ॥

शान्तिपाठ

✠ ✠ ✠

ॐ भद्रं कर्णेभि शृणुयाम देवाः।
भद्रं पश्येम् अक्षभिर्यजत्राः॥
स्थिरै रंगै स्तुष्टुवां सहस्तनुभिः।
व्यशेम देवहितं यदायुः।१।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नः तार्क्ष्यो अरिष्ट नेमिः॥
स्वस्ति नो बृहस्पतिः दधातु ।२।

ॐ शांतिः। शांतिः॥ शांतिः॥।

सूर्याथर्वशीर्ष

अथ सूर्य अथर्व आङ्गिरसं ब्रह्मा ऋषिः आदित्यो देवता गायत्री छन्दः हंसात् अग्निनारायण युक्तं बीजं हृल्लेखा शक्तिः द्विपद आदि सर्ग सयुक्त कीलकं धर्म अर्थ काम मोक्ष इषु जपे विनियोगः ।

षट् स्वर आरूढ बीजेन षड् अङ्गं रक्त अम्बुज संस्थितं सप्त अश्व रथिनं हिरण्यवर्ण चतुर्भुजं पद्म द्वय अभय वरद हस्तं कालचक्र प्रणेतारं च श्री सूर्यनारायणं य एवं वेद स वै ब्राह्मणः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं

ॐ तत् सवितु: वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्
परोरज सेसावदोम्
ॐ आपः ज्योति रसो अमृतं ब्रह्म भू: भुवः स्वः ॐ
सूर्य आत्मा जगतः तु स्थः च
सूर्यात् वै खल्विमानि भूतानि जायन्ते
सूर्यात् यज्ञाः पर्जन्यः अन्नः आत्मा
नमस्ते आदित्याय
त्वं एव केवलं कर्ता असि
त्वं एव प्रत्यक्षं विष्णु: असि
त्वं एवं प्रत्यक्षं ब्रह्मा असि
त्वं एव प्रत्यक्षं रुद्र असि
त्वं एव प्रत्यक्षं ऋक् असि
त्वं एव प्रत्यक्षं यजु: असि
त्वं एव प्रत्यक्षं साम असि
त्वं एव प्रत्यक्षं अथर्व असि
त्वं एव सर्वं छन्द असि
आदितयाद् वायु: जायते
आदित्याद् भूमिः जायते
आदित्याद् आपः जायन्ते
आदित्याद् ज्योतिः जायते
आदित्याद् व्योम दिशो जायन्ते
आदित्याद् वेदा जायन्ते
आदित्याद् देवा जायन्ते
आदित्यो वा एष एतन् मण्डलं तपति
असाव आदित्यो ब्रह्म
आदित्यो अन्तःकरण मनो बुद्धि चित्त अहंकारः
आदित्यो वै व्यान समान उदान अपान प्राणः
आदित्यो वै श्रोत्र वाक् चक्षु: रसना नासाः
आदित्यो वै वाक् पाणि पाद उपस्थ पायुनि

आदित्यो वै शब्द स्पर्श रूप रस गन्धाः
आदित्यो वै वचन आदान गमन आनन्द विसर्गः
आनन्द मयो ज्ञानमयो विज्ञानमयो आदित्यः
नमो मित्रास भानवे मृत्योः मा पाहि भ्राजिष्णवे विश्व हेतवे नमः
सूर्यो नो दिवः पातु वातो अन्तरिक्षात्
अग्निः न पार्थिवेभ्यः
सूर्यात् भवन्ति भूतानि
सूर्येण पालितानि तु
सूर्ये लयं प्राप्नुवन्ति
यः सूर्यः सोऽहं एव च
चक्षुः नो देवः सविता
चक्षुः न उत पर्वतः
चक्षुः धाता दधातु नः
आदित्याय विद्महे सहस्त्र कराय धीमहि तन्नो सूर्यः प्रचोदयात्
सविता पश्चात् तात
सविता पुरः तात
सविता उत्तरात् तात
सविता अधरात् तात
सविता नः सुवतु सर्व तातिम्
सविता नो रासतां दीर्घमायुः
ॐ इति एक अक्षरं ब्रह्म
घृणिः इति द्वे अक्षरे
सूर्य इति अक्षर द्वयं
आदित्य इति त्रीण्य अक्षराणि
एतद वै सुर्यस्य अष्टाक्षरं मनुम् । ॐ घृणिसूर्याय नमः ।

फलश्रुति

यः सदा हरहः जपति

सो ब्रह्मण्यो ब्राह्मणो भवति
सुर्याभिमुखं जप्त्वा महाव्याधि भयात् प्रमुच्यते
अलक्ष्मीः नश्यति
अभक्ष्य भक्षणात् पूतो भवति
अपेय पानात् पूतो भवति
अगम्य गमनात् पूतो भवति
व्रात्य संभाषणात् पूतो भवति
असत् संभाषणात् पूतो भवति
मध्यान्हे सुर्याभिमुखः पठेत्
सद्यः पन्च महापापात् प्रमुच्यते
सैषा सावित्री विद्यां न किंचित् अपि कस्मै चित् प्रशन्सयेत
य एतां महाभागः प्रातः पठति स भाग्यवान् जायते
पशुं विन्दति
वेदार्थं लभते
त्रिकालं जप्त्वा क्रतु शत फलं प्राप्नोति
यो हस्त आदित्ये जपति स महामृत्युं तरति स महामृत्युं तरति
य एवं वेद ।
इति उपनिषद ।

✠ ✠ ✠

श्रीदेव्यथर्वशीर्षम्

ॐ भद्रं कर्णेभि शृणुयाम देवाः।
भद्रं पश्येम् अक्षभिर्यजत्राः॥
स्थिरै रंगै स्तुष्टुवां सहस्तनुभिः।
व्यशेम देवहितं यदायुः।१
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नः ताक्ष्यो अरिष्ट नेमिः॥
स्वस्ति नो बृहस्पतिः दधातु ।२

ॐ शांतिः शांतिः शांतिः

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति ॥१

साब्रवीत् - अहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत् ।
शून्यं चाशून्यं च ॥२

अहमानन्दानानन्दौ । अहं विज्ञानाविज्ञाने। अहं ब्रह्माब्रह्मणी वेदितव्ये ।
अहं पञ्चभूतान्यपञ्चभूतानि। अहमखिलं जगत् ।३

वेदोऽहमवेदोऽहम्। विद्याहमविद्याहम् ।
अजाहमनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम् ॥४

अहं रुद्रेभिर्वसुभिश्चरामि। अहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणावुभौ बिभर्मि। अहमिन्द्राग्नी अहमश्विनावुभौ ॥५

अहं सोमं त्वष्टारं पूषणं भगं दधामि ।
अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥६

अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ।
अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
य एवं वेद । स दैवीं सम्पदमाप्नोति ॥७

ते देवा अब्रुवन् - नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥८

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः ॥९

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥१०
कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् ।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ॥११
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि। तन्नो देवी प्रचोदयात् ।१२

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥१३

कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमातादिविद्योम् ॥१४

एषाऽऽत्मशक्तिः। एषा विश्वमोहिनी। पाशाङ्कुशधनुर्बाणधरा ।
एषा श्रीमहाविद्या। य एवं वेद स शोकं तरति ॥१५

नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः ॥१६
सैषाष्टौ वसवः। सैषैकादश रुद्राः। सैषा द्वादशादित्याः । सैषा विश्वेदेवाः
सोमपा असोमपाश्च। सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः

सिद्धाः। सैषा सत्त्वरजस्तमांसि। सैषा ब्रह्मविष्णुरुद्ररूपिणी । सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतींषि।कलाकाष्ठादिकालरूपिणी । तामहं प्रणौमि नित्यम् ।

पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम्।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ।१७

वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् ।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥१८

एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥१९

वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्
सूर्योऽवामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः ।
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः ।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः ॥२०

हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् ।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ।
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे ॥२१

नमामि त्वां महादेवीं महाभयविनाशिनीम् ।
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ॥२२

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया ।
यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता ।
यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या ।
यस्या जननं नोपलभ्यते तस्मादुच्यते अजा ।
एकैव सर्वत्र वर्तते तस्मादुच्यते एका ।
एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यते
अज्ञेयानन्तालक्ष्याजैका नैकेति ॥२३

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ।

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥२४

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ।
नमामि भवभीतोऽहं संसारार्णवतारिणीम् ॥२५

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति - शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः । दशवारं पठेद् यस्तु सद्यः पापैः प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः ॥२६

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति । निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनायां प्रतिमायां जप्त्वा देवतासांनिध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसंनिधौ जप्त्वा महामृत्युं तरति । स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ।

श्रीदेव्यथर्वशीर्षम् सम्पूर्णम् ।

✠ ✠ ✠

शिवअथर्वशीर्षः

श्री गणेशाय नमः।

ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-
र्व्यशेम देवहितं यदायुः ॥१

स्वस्ति न इन्द्रो वककद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ देवा ह वै स्वर्गं लोकमायंस्ते रुद्रमपृच्छन्को
भवानिति । सोऽब्रवीदहमेकः प्रथममासं वर्तामि च
भविश्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति ।
सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं प्राविशत्
सोऽहं नित्यानित्योऽहं व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः
प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोहं
अधश्चोर्ध्वं चाहं दिशश्च प्रतिदिशश्चाहं

पुमानपुमान् स्त्रियश्चाहं गायत्र्यहं सावित्र्यहं
त्रिष्टुब्जगत्यनुष्टुप् चाहं छन्दोऽहं गार्हपत्यो
दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं
गौर्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं
ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहं
गुह्योहंअरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं
पवित्रमहमुग्रं च मध्यं च बहिश्च
पुरस्ताज्ज्योतिरित्यहमेव सर्वेभ्यो मामेव स सर्वः समां यो
मां वेद स सर्वान्देवान्वेद सर्वांश्च वेदान्साङ्गानपि
ब्रह्म ब्राह्मणैश्च गां गोभिर्ब्राह्माणान्ब्राह्मणेन
हविर्हविषा आयुरायुषा सत्येन सत्यं धर्मेण धर्मं
तर्पयामि स्वेन तेजसा ।
ततो ह वै ते देवा रुद्रमपृच्छन् ते देवा रुद्रमपश्यन् ।
ते देवा रुद्रमध्यायन् ततो देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति ॥ १

ॐ यो वै रुद्रः स भगवान्यश्च ब्रह्मा तस्मै वै नमोनमः ॥ १
यो वै रुद्रः स भगवान् यश्च विष्णुस्तस्मै वै नमोनमः ॥ २
यो वै रुद्रः स भगवान्यश्च स्कन्दस्तस्मै वै नमोनमः ॥ ३
यो वै रुद्रः स भगवान्यश्चेन्द्रस्तस्मै वै नमोनमः ॥ ४
यो वै रुद्रः स भगवान्यश्चाग्निस्तस्मै वै नमोनमः ॥ ५
यो वै रुद्रः स भगवान्यश्च वायुस्तस्मै वै नमोनमः ॥ ६
यो वै रुद्रः स भगवान्यश्च सूर्यस्तस्मै वै नमोनमः ॥ ७
यो वै रुद्रः स भगवान्यश्च सोमस्तस्मै वै नमोनमः ॥ ८
यो वै रुद्रः स भगवान्ये चाष्टौ ग्रहास्तस्मै वै नमोनमः ॥ ९
यो वै रुद्रः स भगवान्ये चाष्टौ प्रतिग्रहास्तस्मै वै नमोनमः ॥ १०
यो वै रुद्रः स भगवान्यच्च भूस्तस्मै वै नमोनमः ॥ ११
यो वै रुद्रः स भगवान्यच्च भुवस्तस्मै वै नमोनमः ॥ १२
यो वै रुद्रः स भगवान्यच्च स्वस्तस्मै वै नमोनमः ॥ १३
यो वै रुद्रः स भगवान्यच्च महस्तस्मै वै नमोनमः ॥ १४

यो वै रुद्रः स भगवान्या च पृथिवी तस्मै वै नमोनमः ॥ १५
यो वै रुद्रः स भगवान्यच्चान्तरिक्षं तस्मै वै नमोनमः ॥ १६
यो वै रुद्रः स भगवान्या च द्यौस्तस्मै वै नमोनमः ॥ १७
यो वै रुद्रः स भगवान्याश्चापस्तस्मै वै नमोनमः ॥ १८
यो वै रुद्रः स भगवान्यच्च तेजस्तस्मै वै नमोनमः ॥ १९
यो वै रुद्रः स भगवान्यश्च कालस्तस्मै वै नमोनमः ॥ २०
यो वै रुद्रः स भगवान्यश्च यमस्तस्मै वै नमोनमः ॥ २१
यो वै रुद्रः स भगवान्यश्च मृत्युस्तस्मै वै नमोनमः ॥ २२
यो वै रुद्रः स भगवान्यच्चामृतं तस्मै वै नमोनमः ॥ २३
यो वै रुद्रः स भगवान्यच्चाकाशं तस्मै वै नमोनमः ॥ २४
यो वै रुद्रः स भगवान्यच्च विश्वं तस्मै वै नमोनमः ॥ २५
यो वै रुद्रः स भगवान्याच्च स्थूलं तस्मै वै नमोनमः ॥ २६
यो वै रुद्रः स भगवान्यच्च सूक्ष्मं तस्मै वै नमोनमः ॥ २७
यो वै रुद्रः स भगवान्यच्च शुक्लं तस्मै नमोनमः ॥ २८
यो वै रुद्रः स भगवान्यच्च कृष्णं तस्मै वै नमोनमः ॥ २९
यो वै रुद्रः स भगवान्यच्च कृत्स्नं तस्मै वै नमोनमः ॥ ३०
यो वै रुद्रः स भगवान्यच्च सत्यं तस्मै वै नमोनमः ॥ ३१
यो वै रुद्रः स भगवान्यच्च सर्वं तस्मै वै नमोनमः ॥ ३२॥

भूस्ते आदिर्मध्यं भुवः स्वस्ते शीर्षं विश्वरूपोऽसि ब्रह्मैकस्त्वं द्विधा
त्रिधा वृद्धिस्तं शान्तिस्त्वं पुष्टिस्त्वं हुतमहुतं दत्तमदत्तं
सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणं च त्वम् ।
अपाम सोममममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृतं मार्त्यस्य ।
सोमसूर्यपुरस्तात् सूक्ष्मः पुरुषः ।
सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यं सूक्ष्मं
सौम्यं पुरुषं ग्राह्यमग्राह्येण भावं भावेन सौम्यं
सौम्येन सूक्ष्मं सूक्ष्मेण वायव्यं वायव्येन ग्रसति स्वेन
तेजसा तस्मादुपसंहर्त्रे महाग्रासाय वै नमो नमः ।

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः ।
तस्योत्तरतः शिरो दक्षिणतः पादौ य उत्तरतः स ओङ्कारः य ओङ्कारः स प्रणवः यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तः योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म यत्परं ब्रह्म स एकः य एकः स रुद्रः य रुद्रः यो रुद्रः स ईशानः य ईशानः स भगवान् महेश्वरः ॥ ३

अथ कस्मादुच्यत ओङ्कारो यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यते ओङ्कारः ।
अथ कस्मादुच्यते प्रणवः यस्मादुच्चार्यमाण एव ऋग्यजुःसामाथर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः ।
अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव सर्वांलोकान्व्याप्नोति स्नेहो यथा पललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्वव्यापी ।
अथ कस्मादुच्यतेऽनन्तो यस्मादुच्चार्यमाण एव तिर्यगूर्ध्वमधस्ताच्चास्यान्तो नोपलभ्यते तस्मादुच्यतेऽनन्तः ।
अथ कस्मादुच्यते तारं यस्मादुच्चारमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते च तस्मादुच्यते तारम् ।
अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव क्लन्दते क्लामयति च तस्मादुच्यते शुक्लम् ।
अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृशति तस्मादुच्यते सूक्ष्मम् ।
अथ कस्मादुच्यते वैद्युतं यस्मादुच्चार्यमाण एव व्यक्ते महति तमसि द्योतयति तस्मादुच्यते वैद्युतम् ।
अथ कस्मादुच्यते परं ब्रह्म यस्मात्परमपरं परायणं च

बृहद्बृहत्या बृंहयति तस्मादुच्यते परं ब्रह्म ।
अथ कस्मादुच्यते एकः यः सर्वान्प्राणान्संभक्ष्य
संभक्षणेनाजः संसृजति विसृजति तीर्थमेके व्रजन्ति
तीर्थमेके दक्षिणाः प्रत्यञ्च उदञ्चः
प्राञ्चोऽभिव्रजन्त्येके तेषां सर्वेषामिह सद्गतिः ।
साकं स एको भूतश्चरति प्रजानां तस्मादुच्यत एकः ।
अथ कस्मादुच्यते रुद्रः यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य
रूपमुपलभ्यते तस्मादुच्यते रुद्रः ।
अथ कस्मादुच्यते ईशानः यः सर्वान्देवानीशते
ईशानीभिर्जननीभिश्च परमशक्तिभिः ।
अमित्वा शूर णो नुमो दुग्धा इव धेनवः । ईशानमस्य जगतः
स्वर्दृशमीशानमिन्द्र तस्थिष इति तस्मादुच्यते ईशानः ।
अथ कस्मादुच्यते भगवान्महेश्वरः यस्माद्भक्ता ज्ञानेन
भजन्त्यनुगृह्णाति च वाचं संसृजति विसृजति च
सर्वान्भावान्परित्यज्यात्मज्ञानेन योगेश्वैर्येण महति महीयते
तस्मादुच्यते भगवान्महेश्वरः । तदेतद्रुद्रचरितम् ॥ ४

एको ह देवः प्रदिशो नु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ।
एको रुद्रो न द्वितीयाय तस्मै य इमांल्लोकानीशत ईशनीभिः ।
प्रत्यङ्जनास्तिष्ठति संचुकोचान्तकाले संसृज्य विश्वा
भुवनानि गोप्ता ।
यो योनिं योनिमधितिष्ठतित्येको येनेदं सर्वं विचरति सर्वम् ।
तमीशानं पुरुषं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति ।
क्षमां हित्वा हेतुजालास्य मूलं बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे ।
रुद्रमेकत्वमाहुः शाश्वतं वै पुराणमिषमूर्जेण
पशवोऽनुनामयन्तं मृत्युपाशान् ।
तदेतेनात्मन्नेतेनार्धचतुर्थेन मात्रेण शान्तिं संसृजन्ति
पशुपाशविमोक्षणम् ।

या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन यस्तां
ध्यायते नित्यं स गच्छेत्ब्रह्मपदम् ।
या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन
यस्तां ध्यायते नित्यं स गच्छेद्वैष्णवं पदम् । या सा
तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन यस्तां
ध्यायते नित्यं स गच्छेदैशानं पदम् ।
या सार्धचतुर्थी मात्रा सर्वदेवत्याऽव्यक्तीभूता खं
विचरति शुद्धा स्फटिकसन्निभा वर्णेन यस्तां ध्यायते
नित्यं स गच्छेत्पदमनामयम् ।
तदेतदुपासीत मुनयो वाग्वदन्ति न तस्य ग्रहणमयं पन्था
विहित उत्तरेण येन देवा यान्ति येन पितरो येन ऋषयः
परमपरं परायणं चेति ।
वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यम् ।
तमात्मस्थं येनु पश्यन्ति धीरास्तेषां शान्तिर्भवति नेतरेषाम् ।
यस्मिन्क्रोधं यां च तृष्णां क्षमां चाक्षमां हित्वा
हेतुजालस्य मूलम् ।
बुद्ध्या संचितं स्थापयित्वा तु रुद्रे रुद्रमेकत्वमाहुः ।
रुद्रो हि शाश्वतेन वै पुराणेनेषमूर्जेण तपसा नियन्ता ।
अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म
व्योमेति भस्म सर्वंह वा इदं भस्म मन एतानि
चक्षूंषि यस्माद्व्रतमिदं पाशुपतं यद्भस्म नाङ्गानि
संस्पृशेत्तस्माद्ब्रह्म तदेतत्पाशुपतं पशुपाश विमोक्षणाय ॥ ५

योऽग्नौ रुद्रो योऽप्स्वन्तर्य ओषधीर्वीरुध आविवेश । य इमा
विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमोऽस्त्वग्नये ।
यो रुद्रोऽग्नौ यो रुद्रोऽप्स्वन्तर्यो ओषधीर्वीरुध आविवेश ।
यो रुद्र इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमोनमः ।
यो रुद्रोऽप्सु यो रुद्र ओषधीषु यो रुद्रो वनस्पतिषु । येन
रुद्रेण जगदूर्ध्वंधारितं पृथिवी द्विधा त्रिधा धर्ता

धारिता नागा येऽन्तरिक्षे तस्मै रुद्राय वै नमोनमः ।
मूर्धानमस्य संसेव्याप्यथर्वा हृदयं च यत् ।
मस्तिष्कादूर्ध्वं प्रेरयत्यवमानोऽधिशीर्षतः ।
तद्वा अथर्वणः शिरो देवकोशः समुज्झितः ।
तत्प्राणोऽभिरक्षति शिरोऽन्तमथो मनः ।
न च दिवो देवजनेन गुप्ता न चान्तरिक्षाणि न च भूम इमाः ।
यस्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्न परं किञ्चनास्ति ।
न तस्मात्पूर्वं न परं तदस्ति न भूतं नोत भव्यं यदासीत् ।
सहस्रपादेकमूर्ध्ना व्याप्तं स एवेदमावरीवर्ति भूतम् ।
अक्षरात्संजायते कालः कालाद्व्यापक उच्यते ।
व्यापको हि भगवान्रुद्रो भोगायमनो यदा शेते रुद्रस्तदा संहार्यते प्रजाः ।
उच्छ्वासिते तमो भवति तमस आपोऽप्स्वङ्गुल्या मथिते मथितं शिशिरे शिशिरं मथ्यमानं फेनं भवति फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति ब्रह्मणो वायुः वायोरोङ्कारः ॐकारात्सावित्री सावित्र्या गायत्री गायत्र्या लोका भवन्ति ।
अर्चयन्ति तपः सत्यं मधु क्षरन्ति यद्भुवम् ।
एतद्धि परमं तपः ।
आपोऽज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरो नम इति ॥ ६

फलश्रुतिः

य इदमथर्वशिरो ब्राह्मणोऽधीते अश्रोत्रियः श्रोत्रियो भवति अनुपनीत उपनीतो भवति सोऽग्निपूतो भवति स वायुपूतो भवति स सूर्यपूतो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वैर्वेदैरनुध्यातो भवति स सर्वेषु तीर्थेषु स्नातो भवति तेन सर्वैः क्रतुभिरिष्टं भवति गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति इतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति ।

प्रणवानामयुतं जप्तं भवति । स चक्षुषः पङ्क्तिं पुनाति ।
आ सप्तमात्पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः
सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति ।
द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति ।
तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यमों सत्यम् ॥ ७

ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-
र्व्यशेम देवहितं यदायुः ॥
ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः

नारायण अथर्वशीर्षम् ।

श्री गणेशाय नमः ।

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेती । नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद् ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतिः प्रजायते नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते । नारायणात्प्रवर्तन्ते । नारायणे प्रलीयन्ते । एतदृग्वेदशिरोऽधीते ॥१

अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । विदिशश्च नारायणः । ऊर्ध्वं च नारायणः । अधश्च नारायणः। अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम् । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति । एतद्यजुर्वेदशिरोऽधीते ॥२

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायण स्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवः सर्वमायुरेति । विन्दते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । एतत्सामवेदशिरोऽधीते ॥३

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्। अकार उकारो मकार इति। ता अनेकधा समभवत्तदेतदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति तदिदं पुण्डरीकं विज्ञानघनं तस्मात्तडिदाभमात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः । ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति । सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मम् । एतदथर्वशिरोऽधीते॥ ४

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायं प्रातरधीयानः पापोऽपापो भवति। मध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात्प्रमुच्यते। सर्ववेदपारायणपुण्यं लभते। नारायणसायुज्यमवाप्नोति श्रीमन्नारायण सायुज्यमवाप्नोति य एवं वेद ॥५

इत्युपनिषत् ।

अथ श्रीगुह्येश्वरी शतनामस्तोत्रम्

श्रीगणेशाय नमः । श्रीगुह्येश्वर्यै नमः । ॐ भैरवाय नमः ।
ॐ कालि कालि महाकालि कालिके पापहारिणी ।
धर्ममोक्षप्रदे देवि गुह्यकालि नमोऽस्तुते ॥१

गुह्यकाली महाकाली गुह्यश्री गुह्यभैरवी ।
योगेश्वरी महामाया महायोगेश्वरी शिवा ॥२

गुह्येश्वरी सिद्धिकाली योगिनी सिद्धयोगिनी ।
सिद्धिगुह्यमहाकाली सिद्धियोगेश्वरेश्वरी ॥३

चिचिन्दगुह्यकाली च ज्वालासिद्धिकरालिका ।
सिद्धेश्वरी सिद्धिलक्ष्मीर्भद्रकाली कपालिनी ॥४

ज्वालाकरालवदना गुह्यकन्याकुमारिका ।
सिद्धिगुह्यमहालक्ष्मीदेवराजकुलेश्वरी ॥५

राजराजेश्वरी चैव महामङ्गलयोगिनी ।
योगमाया योगकन्या महाविद्येश्वरेश्वरी ॥६

महाघोरा कालरात्री कालसंकर्षिणी युधा ।
राजेश्वरी राजलक्ष्मीर्राजभद्रेश्वरेश्वरी ॥७

कालीगुह्योचरोगुह्य महाज्ञानप्रदायिनी ।
रुद्रचण्डा महाचण्डा कालचण्डा कुलेश्वरी ॥८

श्रीमहागुह्यकाली च जगन्माता जगन्मयी ।
महाकाली गुह्यकाली सर्वमङ्गलमङ्गला ॥९

महोगगुह्यकाली च गुह्यभैरवयोगिनी ।
महाकौलगुह्यकाली महाकौलेश्वरेश्वरी ॥१०

कुलाकुलमहातत्त्वा नृपतृप्ता निराश्रया ।
ब्रह्मविद्या जगद्धात्री वशिष्ठाश्रमयोगिनी ॥११

गुह्यवामिमहादेवी कुलमार्तण्डयोगिनी
श्रीशक्तिगुह्यकाली च महाभैरववाहिनी ॥१२

विंशतगुह्यकाली च साम्नाक्षी गुह्यकालिका ।
वेदान्ता वेदविद्या च सर्वलोकैकसाक्षिणी ॥१३

श्मशानभैरवी काली महाघोराप्रपूजिता ।
ज्वाला च कालिका चैव महासंहारकालिका ॥१४

स्थितिचण्डामहाकाली सृष्टिप्रियकरीणि या ।
परयोगी परंगुह्य गुह्यकाली निकीर्तिताम् ॥१५

विनिवृत्याक्रिया यो वै नाम्ना स्तोत्रं शतं शुभम् ।
इति गुह्यतरं दिव्यं सर्वाम्नायप्रगोपितम् ॥१६

सारात्सारतरं भद्रे देवतन्त्रेषु कीर्तितम् ।
सकृत् जप्त्वा गुह्यकाल्या चतुर्वर्गफलंलभेत् ॥१७

यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरी ॥१८

॥ श्रीगुह्यकाली शतनामस्तोत्रं सम्पूर्णम् ॥

विष्णुषट्पदी

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णां ।
भूतदयां विस्तारय तारय संसारसागरतः ॥ १

दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥ २

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥ ३

उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४

मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधां ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहं ॥ ५

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥ ६

नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७

॥ इति श्रीमद् शङ्कराचार्यविरचितं विष्णुषट्पदीस्तोत्रं संपूर्णम् ॥

अच्युताष्टकम्

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्रं भजे ॥१

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं सन्दधे ॥२
विष्णवे जिष्णवे शाङ्खिने चक्रिणे रुक्मिणिरागिणे जानकीजानये ।
बल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३

कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरौः सेवितोऽगस्तसम्पूजितो राघव पातु माम् ॥५

धेनुकारिष्टकानिष्टकृद्द्वेषिहा केशिहा कंसहृद्वंशिकावादकः ।
पूतनाकोपकःसूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥६

विद्युदुद्योतवत्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥७

कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे ॥८
अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृविश्वम्भरस्तस्य वश्यो हरिर्जायते सत्वरम् ॥९

श्री शङ्कराचार्य कृतं अच्युताष्टकम् ।

श्रीरुद्राष्टकम्

नमामीशमीशान निर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
निजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेऽहम् ॥ १

निराकारमोंकारमूलं तुरीयं गिरा ज्ञान गोतीतमीशं गिरीशम् ।
करालं महाकाल कालं कृपालं गुणागार संसारपारं नतोऽहम् ॥ २

तुषाराद्रि संकाश गौरं गभीरं मनोभूत कोटिप्रभा श्री शरीरम् ।
स्फुरन्मौलि कल्लोलिनी चारु गङ्गा लसद्भालबालेन्दु कण्ठे भुजङ्गा ॥ ३

चलत्कुण्डलं भ्रु सुनेत्रं विशालं प्रसन्नाननं नीलकण्ठं दयालम् ।
मृगाधीशचर्माम्बरं मुण्डमालं प्रियं शंकरं सर्वनाथं भजामि ॥ ४

प्रचण्डं प्रकृष्टं प्रगल्भं परेशं अखण्डं अजं भानुकोटिप्रकाशम् ।
त्रयः शूल निर्मूलनं शूलपाणिं भजेऽहं भवानीपतिं भावगम्यम् ॥ ५

कलातीत कल्याण कल्पान्तकारी सदा सज्जनानन्ददाता पुरारी ।
चिदानन्द संदोह मोहापहारी प्रसीद प्रसीद प्रभो मन्मथारी ॥ ६

न यावत् उमानाथ पादारविन्दं भजन्तीह लोके परे वा नराणाम् ।
न तावत् सुखं शान्ति सन्तापनाशं प्रसीद प्रभो सर्वभूताधिवासम् ॥ ७

न जानामि योगं जपं नैव पूजां नतोऽहं सदा सर्वदा शम्भु तुभ्यम् ।
जरा जन्म दुःखौघ तातप्यमानं प्रभो पाहि आपन्नमामीश शम्भो ॥ ८

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये ।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति ॥९

॥ इति श्रीगोस्वामितुलसीदासकृतं श्रीरुद्राष्टकं संपूर्णम् ॥

अथ शिवताण्डवस्तोत्रम्

श्रीगणेशाय नमः ॥

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥२

धराधरेन्द्रनंदिनीविलासबन्धुबन्धुर
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे(क्वचिच्चिदम्बरे) मनो विनोदमेतु वस्तुनि ॥३

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥४

सहस्रलोचनप्रभृत्यशेषलेखशेखर
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटक
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥५

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदेशिरोजटालमस्तु नः ॥६

करालभालपट्टिकाधगद्धगद्धगज्ज्वल
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥७

नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरंधरः ॥८

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदांधकच्छिदं तमन्तकच्छिदं भजे ॥९

अगर्व सर्वमङ्गलाकलाकदम्बमञ्जरी
रसप्रवाहमाधुरी विजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१०

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस
द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट् ।

धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः ॥११

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो
गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समं प्रव्रितिकः कदा सदाशिवं भजाम्यहम ॥१२

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३

निलिम्प नाथनागरी कदम्ब मौलमल्लिका-
निगुम्फनिर्भक्षरन्म धूष्णिकामनोहरः ।
तनोतु नो मनोमुदं विनोदिनींमहनिशं
परिश्रय परं पदं तदङ्गजत्विषां चयः ॥१४

प्रचण्ड वाडवानल प्रभाशुभप्रचारणी
महाष्टसिद्धिकामिनी जनावहूत जल्पना ।
विमुक्त वाम लोचनो विवाहकालिकध्वनिः
शिवेति मन्त्रभूषगो जगज्जयाय जायताम् ॥१५

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसंततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिंतनम् ॥१६॥

पूजावसानसमये दशवक्त्र गीतं यः शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां लक्ष्मीं सदैव सुमुखिं प्रददाति शम्भुः ॥१७

इति श्रीरावण कृतं शिव ताण्डवस्तोत्रं सम्पूर्णम् ।

विष्णुपञ्जरं

पुष्कर उवच ।

त्रिपुरञ्जघ्नुषः पूर्वं ब्रह्मणा विष्णुपञ्जरं ।
शङ्करस्य द्विजश्रेष्ठ रक्षणाय निरूपितं ॥ १

वागीशेन च शक्रस्य बलं हन्तुं प्रयास्यतः ।
तस्य स्वरूपं वक्ष्यामि तत्त्वं शृणु जयादिमत् ॥ २

विष्णुः प्राच्यां स्थितश्चक्री हरिर्दक्षिनणतो गदी ।
प्रतीच्यां शार्ङ्गधृग्विष्णुर्जिष्णुः खड्गी ममोत्तरे ॥ ३

हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः ।
क्रोड़रूपी हरिर्भूमौ नरसिंहो ऽम्बरे मम ॥ ४

क्षुरान्तममलञ्चक्रं भ्रमत्येतत् सुदर्शनं ।
अस्यांशुमाला दुष्प्रेक्ष्या हन्तुं प्रेतनिशाचरान् ॥ ५

गदा चेयं सहस्राच्चिर्ःप्रदीप्तपावकोज्ज्वला ।
रक्षोभूतपिशाचानां डाकिनीनाञ्च नाशनी ॥ ६

शार्ङ्गविस्फूर्ज्जितञ्चैव वासुदेवस्य मद्रिपून् ।
तिर्य्यङ्मनुष्यकुष्माण्डप्रेतादीन् हन्त्वशेषतः ॥ ७

खड्गधारोज्ज्वलज्योत्स्नानिर्द्धूता ये समाहिताः ।
ते यान्तु शाम्यतां सद्यो गरुड़ेनेव पन्नगाः ॥ ८

ये कुष्माण्डास्था यक्षा ये दैत्या ये निशाचराः ।
प्रेता विनायकाः क्रूरा मनुष्या जम्भगाः खगाः ॥ ९

सिंहादयश्च पशवो दन्दशूकाश्च पन्नगाः ।
सर्वे भवन्तु ते सौम्याः कृष्णशङ्खरवाहताः ॥ १०

चित्तवृत्तिहरा ये मे ये जनाः स्मृतिहारकाः ।
बलौजसाञ्च हर्त्तारश्छायाविभ्रंशकाश्च ये ॥ ११

ये चोपभोगहर्त्तारो ये च लक्षणनाशकाः ।
कुष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः ॥ १२

बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैन्द्रियकं तथा ।
ममास्तु देवदेवस्य वासुदेवस्य कीर्त्तनात् ॥ १३

पृष्ठे पुरस्तान्मम दक्षिणोत्तरे विकोणतश्चास्तु जनार्दनो हरिः ।
तमीड्यमीशानमनन्तमच्युतं जनार्दनं प्रणिपतितो न सीदति ॥ १४

यथा परं ब्रह्म हरिस्तथा परः जगत्स्वरूपश्च स एव केशवः ।
सत्येन तेनाच्युतनामकीर्त्तनात् प्रणाशयेत्तु त्रिविधं ममाशुभं ॥ १५

इत्याग्नेये महापुराणे विष्णुपञ्जरं नामोनसप्तत्यधिकद्विशततमो ऽध्यायः
।

भागवतप्रकरण

श्रीमद्भागवतमा दोस्रो दिनबाट नाम मात्रले मण्डपपूजा गर्नका लागि संक्षिप्त पूजा राखिएको छ :

हरेक दिनको छोटो मण्डपपूजा

अद्येह पूर्वोच्चारित सङ्कल्पसिद्धिरस्तु.. गोत्रात्पन्न नाम्नोऽहं मम पूर्वदिनादारभ्य मातृपितृपत्नी कुलोद्भवाः एकविंशत्य पितृणां एतत् गत्याः सन्ति तत्तद गत्यः मुक्त्यर्थे एवञ्च कैवल्यमुक्ति कामनयाः एतद्तिरिक्या तामस, राजस, सात्विका ज्ञाताज्ञात प्रेतपितृगणाः कैवल्यगति प्राप्तये च लक्ष्मीनारायण प्रसादात् दहराकाशे अविच्छिन्न भगवत्भक्ति प्राप्तिपूर्वक मनसिनिरतिसयानन्द प्राप्तये प्रथम दिवसीय ....श्रीमद्भागवतमहापुराण सप्ताहविधिना पाठपारायण, कथाश्रवण एवञ्च वेदरुद्रि जपहवन कर्मणञ्च वयं करिष्यामहें/अहं करिष्ये ।

- ☐ दीप कलश गणेश पूजा,
- ☐ ब्रह्मा विष्णु महेश पूजा,
- ☐ चारवेद पूजा,

➢ **नवग्रह ईशान** :

ॐ साङ्गेभ्यः सपरिवारेभ्यः सयोगिनीभ्यः सवाहनेभ्यः सायुधेभ्यः सपार्श्वदेभ्यः अधिप्रत्यधिदेव सहितेभ्यो नवग्रहेभ्यो नमः ।

➢ **नैऋत्यकोणे :**

ॐ साङ्गाय, सायुधाय, सपार्श्वदाय, सपरिवाराय, सवाहनाय, वास्तोस्पतये नमः ।

बीचमण्डपको बाहिरी भागमा रहेका लिङ्ग, दिक्पाल र तोरणको पूजाः

१ पीतपताकायुक्त पूर्वद्वारे :

➢ **तोरणे**:

- सुदृढतोरणय नमः ।
- **तोरणपार्श्वयो**: राहवे नमः । गुरवे नमः ।

➢ **द्वारबीचमा**

ॐ साङ्गाय शचीसहिताय सायुधाय ऐरावत दिग्गजसहिताय इन्द्राय नमः ।

➢ **द्वार र द्वारको माथितल** :

- ॐ द्वारश्रियै नमः ।
- द्वारको उपरिभागमा ॐ उर्ध्व देहल्यै नमः ।
- द्वारको अधभागमा ॐ अधो देहल्यै नमः ।

➢ **द्वारका दायाँवायाँ रहेका स्तम्भ(लिङ्ग)माः**

ॐ जयाय नमः ॐ विजयाय नमः ।

➢ **दायाँवायाँ रहेका कलशमाः**

ॐ गङ्गायै नमः ॐ यमुनायै नमः ।

➢ **तोरणमाथिः**

ॐ इन्द्रधातृभगेभ्यो नमः ।

२ रक्तपतासहितको आग्नेयद्वारबीच कलशमाः

ॐ पुण्डरीक दिग्गजसहिताय, साङ्गाय, सवानाय सायुधाय सस्वाहाशक्तिकाय अग्नये नमः ।

३. कृष्णपताका दक्षिणद्वारे

- ॐ सुभद्रतोरणय नमः ।

➢ **तोरणपार्श्वमाः**

- ॐ सूर्याङ्गारकाभ्यां नमः ।

➢ **द्वारको बीच कलशमा :**

ॐ साङ्गाय,सायुधाय, इलासहिताय वामन दिग्गजसहिताय यमाय नमः ।

द्वार र द्वारको माथितल :

- ॐ द्वारश्रियै नमः ।
- द्वारको उपरिभागमा ॐ उर्ध्व देहल्यै नमः ।
- द्वारको अधभागमा ॐ अधो देहल्यै नमः ।

➢ **द्वारका दायाँवायाँ रहेका स्तम्भ(लिङ्ग)माः**

- ॐ पुण्यशीलाय नमः ॐ सुशीलाय नमः ।

➢ **द्वारका दायाँवायाँ रहेका कलशमाः**

- ॐ गोदावरीकृष्णापुषमित्रवरुणेभ्यो नमः

४ नीलपताकायुक्त नैऋत्यद्वारे :

ॐ कुमुददिग्गजसहिताय, साङ्गाय सकालिकाशक्तिकाय निऋतये नमः

५. श्वेतपताकायुक्त पश्चिमद्वारे :

➢ **तोरणे**ः

- ॐ सुकर्मतोरणय नमः ।

➢ **तोरणपार्श्वयोः**

- ॐ शुक्राय नमः । बुधाय नमः ।

➢ **द्वारबीचमा**

ॐ अञ्जनदिग्गजसतिाय साङ्गाय पद्मिनीशक्तिकाय सायुधाय वरुणाय नमः ।

➢ **द्वार र द्वारको माथितल** :

- ॐ द्वारश्रियै नमः ।

➢ **द्वारको उपरिभागमा :**

- ॐ उर्ध्व देहल्यै नमः ।

➢ **द्वारको अधभागमा** :

- ॐ अधो देहल्यै नमः ।

➢ **द्वारका दायाँवायाँ रहेका स्तम्भ(लिङ्ग)माः**

ॐ नन्दाय नमः । सुनन्दाय नमः ।

➢ **दायाँवायाँ रहेका कलशमाः**

ॐ रेवाताप्तीअर्यमाविवश्वदंशूभ्यो नमः ।

६. धूमपताकासहित वायव्यद्वारे :

ॐ पुष्पदन्तदिग्गजसहिताय साङ्गाय मोहिनीशक्तिकाय सायुधाय वायवे नमः ।

७. नीलपताकायुक्त उत्तरद्वारे :

➢ **तोरणमा** :

- ॐ सुहोत्रतोरणाय नमः ।

➢ **तोरणपार्श्वयोः**

- ॐ सोमकेतूभ्यां नमः ।

➢ **द्वारको बीच कलशमाः ।**

- ॐ सार्वभौमदिग्गजसहिताय साङ्गाय चित्रिणीशक्तिकाय

सायुधाय सोमाय नमः ।

- **द्वारमा** :
- ॐ द्वारश्रियै नमः ।

- **द्वारको माथितलः**
- ॐ उर्ध्व देहल्यै नमः ॐ अधो देहल्यै नमः ।
- **स्तम्भ (लिङ्ग)मा**:
- ॐ चण्डाय नमः । ॐ प्रचण्डाय नमः ।
- **द्वारकलशमा** :
- ॐ वाणीवेणीत्वष्टृसविताविष्णुभ्यो नमः ।

८. श्वेतपताकासहित ईशानद्वारे :

ॐ सुप्रतिक दिग्गजसहिताय, साङ्गाय सायुधाय गौरीशक्तिकाय ईशानाय नमः ।

९. रक्तपताका नैऋत्य र वरुण(पश्चिमबिचको कलशमा)

ॐ सवाहनाय साङ्गाय सायुधाय लक्ष्मीशक्तिकाय अनन्ताय नमः ।

१०. रक्तपताका पूर्वईशानका बीचको कलशमा)

ॐ सवाहनाय साङ्गाय सायुधाय सावित्रीशक्तिकाय ब्रह्मणे नमः ।

मण्डमा रहेका १६ लिङ्गहरूको पूजा आग्नेयबाट क्रमशः

बीच मण्डपका लिङ्गहरूमा :

१.**आग्नेयमा** : वसुधायै नमः । २. **नैऋत्यमा** : भद्रायै नमः ।

३. **वायव्यमा** : अदित्यै नमः ४. **ईशानमा** : नन्दायै नमः ।

बाहिर ईशानबाट १२ लिङ्गमा क्रमशः

१.भूत्यै नमः । २.सरस्वत्यै नमः । ३. पूर्वसन्ध्यायै नमः ।
४.मध्यमसन्ध्यायै नमः । ५. पश्चिमसन्ध्यायै नमः ।
६.गायत्र्यै नमः ७. सावित्र्यै नमः
८ वृहस्पत्यै नमः ९. अदित्यै नमः,
१०.विनतायै नमः, ११.पूर्णिमायै नमः
१२. सिनीवाल्यै नमः,

➢ **वाँसमा**

- किन्नरायै नमः ।

➢ **पृष्ठमा**

- पन्नगेभ्यो नमः ।

➢ **शाखाबन्धनहरूमा**

- सर्वदेवेभ्यो नम ।

➢ **हनुमानपूजा**
नैऋत्यमा ध्वजासहित राख्ने ।

➢ **पाञ्चायन पूजाः**

- गणेशपूजा ।
- सूर्यपूजा ।
- देवीपूजा ।
- शिवपूजा ।
- गरुडध्वजा पूजा आब्रह्मणले, पुराण अनुसार फरक हुन्छ ।

➢ **लक्ष्मीनारायण पूजा** (कर्ता परिवार भेला भएर)
धुप, बत्ती, नैवेद्य पछि

➢ **पितृ उद्धार भागवतमा लक्ष्मीनारायण पूजा प्रार्थना :**

हे कृष्ण ! हे दयासिन्धो ! करुणाकर ! केशव !
अद्य पुण्यप्रभावेण गृहे भागवतं कृतम् ॥१

अस्मद्वंशे मृता ये च मातृ वंशे तथैव च ।
मातरः पितरश्चैव गच्छन्तु परमं पदम् । । २
पत्नी वंशे मृता ये वै स्त्रियश्च पुरुषाश्च ते ।
गुरुश्वसूर बन्धनां ये चान्ये बान्धवाः मृताः ॥३

पितृवंशे मृता ये च ये मृता पिथिवी तले ।
मुक्तिं प्राप्य सदा यान्तु परमं पदमव्ययम् ॥४

ज्ञाताज्ञातादयः सर्वे बान्धवा मम वंशजाः ।
अनेक योनीमापन्ना सर्वेमुक्ता भवन्तु ते ॥५

प्रेतयोनिङ्गताः ये च अनेक योनिमागताः ।
तेऽपि मोक्षमवाप्नोयुः भगवन् ! कृपया तव ॥६

स्वउद्धारका लागि :
संसार सागरे मग्नं दीनं मां करुणानिधे ।
कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥७

➢ **पुस्तकपूजाः**

भागवत ग्रन्थ पूजा प्रार्थनाः

- श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।
  स्वीकृतोऽसि मयानाथ मुक्त्यर्थं भव सागरे ॥१
- मनोरथो मदीयोऽयं सफलः सर्वथा त्वया
  निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥२

पितृ उद्धारको लागि :

- पित्रुद्धारस्य कामाय कृते भागवतेऽधुना ।
  सफलं कुरु देवेश ! भगवन् ! भक्तवत्सलः ॥३

➢ व्यासगुरुपूजाः

वक्ता प्रार्थनाः

- शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ।
  एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥
- व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
  नमो वै ब्रह्म विलये वाशिष्ठाय नमोनमः ॥

➢ कुलपूजा :

कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायश्विनाध्वर्यु सादयतामिह त्वा ।

प्रार्थनाः

➢ पितृ उद्धार भागवतमा पितृपूजाः

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥३

ॐ पितृगणाय विद्महे जगत धारिणी धीमहि तन्नो पितृो प्रचोदयात् ।

➢ पितृको प्रार्थनाः

बहूनि मे व्यतीतानि जन्मानि कृष्णमायया ।
पूर्वजानुग्रहेणैव ज कृते भागवतेऽधुना ॥१

पित्रुद्धारस्य कामाय जाता भागवती कथा ।
पितृप्रेतादयो ये मे वंशजा मुक्तिभागिनः ॥२

पितृमातृ तथा पत्नी वंशे वै मुक्ति कामिनः ।
ते सर्वेऽत्र समागम्य श्रुत्वा गच्छत तत्पदम् ॥३

➢ सातआँखे वाँस वा घडामा पूजा :

अपसव्य भई पूजा गर्ने :

ॐ अक्रंकर्मः कर्मकृतः सद्वाचा मयोभुवा ।
देवेभ्यः कर्म कृत्वारतं प्रेतं सचाभुवः ॥
पूजापछि धुपबत्ती गरी नैवेद्य चढाएपछि

प्रार्थना

अस्मद्वंशे मृता ये च ये मृता पिथिवी तले ।
प्रेतयोनिं गता ये वै गच्छन्तु पदमव्ययम् ॥१

ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
संस्काररहिता ये च क्रियालोपगताश्च ये ॥२

अपुत्रिणो मृता ये च ज्वालाग्निभिर्मृता तथा ।
महाप्रेत गता ये च तृषार्ता परिपीडिताः ॥३

असङ्ख्याता महाप्रेता शाखान्यग्रोधसंस्थिताः ।
सर्पव्याग्र हता ये च विद्युत्पातादिभिस्तथा ॥४

सप्त गोत्रे मृता ये च प्रेतभाव समागताः ।
नरकेषु समस्तेषु महाकष्टेन पीडिताः ॥ ५

युद्धे, याने मृता ये च ये मृता पाशबन्धनात् ।
वार्यग्निवायुपृथ्व्यादिदोषेण मृत्युमागताः ॥६

प्रेतयोनिङ्गताः ये च अनेक योनिमागताः ।

प्रेतलोके च ये जाता कुल धर्मविवर्जिताः ॥७

क्रियालोपगताश्चैव ज्ञाताज्ञात कुले मम ।
विरूपा आमगर्भाश्च प्रेतत्व मुक्तिकाङक्षिणः॥८

ये के चित् तामसाः प्रेताः सात्विका राजसा तथा ।
दिविभूम्यन्तरिक्षस्थाः जात्यन्धाःपङ्गवस्तथा ॥९

क्षुधातृषादिसंयुक्ताः पीण्डदानविवर्जिताः ।
आगच्छन्तु च ते सर्वे वंशे(घटे) तिष्ठन्तु प्रेतजाः ॥१०

धुन्धुकारी यथा मुक्तस्तथा सर्वेऽपि वायवः ।
मुक्ताः भवन्तु सद्यो वै श्रीमद्भागवश्रवात् ॥११

सव्य भएर हातगोडा धोई भागवत श्रवण स्थलमा अएर

- **ब्राह्मण वरण गर्ने ।**
- **आरती पुष्पाञ्जली गर्ने ।**

विशेष स्तुति प्रकरण :

मङ्गल कामना :

- काले वर्षतु पर्जन्य र्पथिवी शस्यशालिनी ।
  देशोऽयं क्षोभरहितः ब्राह्मणाः सन्तु निर्भयाः ॥
- अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
  अभाललोचनः शम्भु भगवान् वादरायणः ।

राधाकृष्ण :

कान्ति सिताऽमृशति निन्दितशारदेन्दु र्यत्रैकतो विलसितामसिताङ्गशोभाम् ।
वृन्दावनेऽपिकृतयामुनगाङ्गसङ्गं राधामुकुन्दयुगलं तदहं नमामि ॥

कृष्ण :

- ध्येयं सदा परिभवग्नमभिष्ट दोहं तीर्थास्पदं शिवविरञ्ची नुतं शरण्यम् ।
  भृत्यार्थीहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुषते चरणरविन्दम् ।
- स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया
  मनश्च भद्रं भजता दधोक्षजः आवेश्यतां नो मतिरप्य हैतुकी ।
- अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी
  लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥
- कस्तुरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं
  नासाग्रे वरमौक्तिकं करतले वेणुःकरे कङ्कणम् ।
  सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली
  गोपस्त्रीपरिवेष्टितो विजयते गोपालचुडामणिः ॥

- अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसुनाप्लुतम्
  वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।
  स्रस्तस्रस्तनिबद्धनीविविलसद्गोपीसहस्रावृतं
  हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥

- वन्दे श्रीकृष्णदेवं मुरनरकभिदं वेदवेदान्तवेद्यं
  लोके भक्तिप्रसिद्धं यदुकुलजलधौ प्रादुरासीदपारे ।
  यस्यासीद् रूपमेवं त्रिभुवनतरणे भक्तिवद्य स्वतन्त्रं
  शास्त्रं रूपं च लोके प्रकटयति मुदा यः स नो भूतिहेतुः ॥

- बर्हापीडं नटवरवपुःकर्णयोर्कर्णिकारं
  विभ्रदवासःकनककपिसं वैजयन्तिं च मालांम् ।
  रन्ध्रान्वेणोरधरसुधया पुरयन् गोपवृन्दै
  र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥

- त्यक्त्वा सुदुस्त्यजसुरेप्सित राज्यलक्ष्मी
  धर्मिष्ठ आर्यवचसाय जगादरण्यं
  मायामृगं दयितयेप्सितमन्यधावद्
  वन्दे महापुरुषते चरणारविन्दम् ॥

- प्रपन्न पारिजाताय तोत्त्रवेत्रैकपाणये ।
  ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नम ॥

वासुदेव :

- नमः परमकल्याण नमः परम मङ्गल
  वासुदेवाय शान्ताय यदुनां पतये नमः॥

- जयति जयति देवो देवकी नन्दनोऽयं
  जयति जयति कृष्णे वृष्णिवंश प्रदीपः
  जयति जयति मेघश्यामलः कोमलाङ्गो
  जयति जयति पृथ्वी भारनाशोमुकुन्दः ॥

सर्वमेव :

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणंत्वमेव,त्वमेव सर्वं मम देवदेव ॥

वादरायण :

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाल लोचन शम्भुः भगवान् वादरायण ।

भागवती गाथा :

श्रीधरंश्रीधरंवन्दे श्रीधरेयं परायणम् ।
यस्यैव श्री प्रसादेन श्रीधरेयं कृतिः कृता ।
राधा भक्ति र्हरिभक्तिताभ्यां या च समन्विता ।
तां श्रीभागवतीं गाथां वन्दे युगलरुपिणीम् ॥

सत्य :

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

व्यास :

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे
नमो वै ब्रह्म विलये वाशिष्ठाय नमोनमः ॥

गोविन्द :

नमः ये पुरुषं त्वाऽद्यमीश्वरं प्रकृतेः परम् ।
अलक्षं सर्वभूतानांअन्तर्बहिरवस्थितम् ॥
कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

अनन्त :

- नमःते देवदेवेश नमःते गरुडध्वजः ।
  नमस्तेकमलाकान्त अनन्ताय नमोनमः ॥
- नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादा क्षिशिरोरुवाहवे ॥
  सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारणे नमः ॥

अनन्त संसारमहासमुद्रे मग्न समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व अनन्तसूत्राय नमो नमस्ते ॥

माधव :

मूकंकरोति वाचालं पङ्गुंलङ्गयते गिरिम् ।
यत्कृपात महंवन्दे परमानन्दमाधवम् ॥
अज्ञान तिमिरान्धस्य ज्ञानेनानेन माधवः ।
प्रसादसुमुखो भुत्वा ज्ञानदृष्टिप्रदो भवः ॥

व्यास :

- यः स्वानुभावमखिलश्रुतिसारमेक
  मध्यात्मदीपमतितितिर्षतां तमोऽन्धम् ।
  संसारिणां करुणयाऽह पुराणगुह्यं
  तं व्याससूनुमुपयामि गुरुं मुनीनाम् ।
- नमोऽस्तुते व्यास विशालबुद्धे फुल्लारविन्दायतपत्र नेत्र ।
  येन त्वया भारततैलपूर्ण प्रज्वालितो ज्ञानमयः प्रदीप ॥
- अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
  अभाललोचनः शम्भु भगवान् वादरायणः ।

शुक :

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो
प्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।
व्यतनुत कृपया यस्तत्वदीपं पुराण
मखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥

ब्रह्म :

- यस्माज्जातं जगत्सर्वं यस्मिन्नेव विलीयते ।
  यनेदंधार्यते विश्वं तस्मै ज्ञानात्मने नमः ॥
- यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोतितस्मै ।
  तंहदेवं आत्मबुद्धि प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

ब्रह्मस्तोत्रम् :

जितं ते पुण्डारीकाक्ष पूर्णषड्-पुण्यविग्रह ।
परमानन्द परंब्रह्मा नमस्ते चतुरात्मने ॥

कूर्मस्तोत्र :

नयस्मात् संजायते कृत्स्नं यत्र चैव प्रलीयते ।
नमस्तस्मै महेशाय विष्णवे कूर्मरुपिणे ॥[१३]

हनुमान :

- अतुलितबलधामं हेमशैलाभदेहं
  दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
  सकलगुणनिधानं वानराणामधीशं
  रघुपतिप्रियभक्तं वातजातं नमामि ॥
- मनोजवं मारुततुल्यवेगमं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
  वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥

इन्द्रस्तुति :

ऐरावतसमारुढो वज्रहस्ते महाबलः ।
शतयज्ञाभिधो देवस्तस्मादिन्द्रया ते नमः ।

गुरु :

- ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
  गुरुः साक्षात् परब्रह्म तस्मै श्री गुरुवे नम : ॥

- ब्रह्मस्थान सरोजमध्यविलसच्छीतांशु पीठस्थितं ।
  स्फूर्जत्सूर्यरुचिं वराभयकरं कर्पूरकुन्दोज्ज्वलम् ॥

---

[१३] कू. पु. २।४४।१४८

श्वेतस्रग्वसनानुलेपनयुतं विद्युद्रुचाकान्तया ।
संश्लिष्टार्धतनुं प्रसन्नवदनं वन्दे गुरुं सादरम् ॥

- ध्यान मूलं गुरो मूर्तिः पूजामूलं गूरो पदम् ।
  मन्त्र मूलं गुरो वाक्यं मोक्षमूलं गुरोः कृपा ॥
- नमामि सद्‌गुरुं शान्तं प्रत्यक्षं शिवरुपिणम् ।
  गिरसायज्ञ पीठस्थ तस्मै श्री गुरवे नमः ॥

सर्वरूप हरिवन्दना :

- यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
  बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः
  अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
  सोऽयं लो विदधातु वांछितफलं त्रैलोक्यनाथो हरिः ।

यशोदा :

- क्षौम वासः पृथुकटि तटे बिभ्रती सूत्रनद्धं
  पुत्रस्नेहस्नुतकुचयुगं जातकं तं च सुभ्रूः ।
  रज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च
  स्विन्नं वक्त्रंकबर विगलन्मालती निर्ममन्थ ॥

एकश्लोकी भागवत :

आदौ देवकिदेवगर्भजननं गोपीगृहे वर्धनम्
मायापूतनजीवितापहरण गोवर्धनोद्धारणम् ।
कंस खंडनकौरवादिहनन कुन्तीसुतां पालनम्
एतद्‌भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥

एकश्लोकी रामायण :

आदौ राम तपोवनादि गमनं, हत्वा मृगं कांचनम् ।
वैदीहीहरणं जटायुमरणं सुग्रीवसंभाषणम् ॥
बालीनिर्दलनं समुद्रतरणं, लंकापुरीदाहनम् । पश्चाद् रावण
कुम्भकर्ण हननम् एतद्धि रामायणम् ॥

एकश्लोकी महाभारत

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्
द्यूते श्रीहरणं वने विहरणं मत्स्यालये वर्तनम् ।
लीलागोग्रहणं रणे विहरणं सन्धिक्रियाजृम्भणं
पश्चाद्भीष्मसुयोधनादिनिधनं ह्येतन्महाभारतम् ॥

ग्रहसँग सम्बन्धित स्तोत्रहरू :

शनी प्रार्थना :

- नमस्ते कोणसंस्थाय पिङ्गलाय नमोऽस्तुते ।
  नमस्ते विभुरूपाय कृष्णाय च नमोऽस्तुते ॥१
- नमस्ते रौद्रदेहाय नमःते चान्तकाय च ।
  नमस्ते यमसंज्ञाय नमःते सौरये विभो ॥२
- नमस्ते मन्दसंज्ञाय शनैश्चर नमोऽस्तुते ।
  प्रसादं कुरु देवेश दीनस्य प्रणतस्य च ॥३

पीपल प्रार्थना :

- अश्वत्थ यस्मिन्त्वयि वृक्षराजे
  नारायणस्तिष्ठति सर्वकाले ।
  अतस्तुतस्त्वं सततं तरुणां
  धन्योऽसि चारिष्टविनाशकोऽसि ॥
- अश्वत्थ हुतभुग्वास गोविन्दस्य गदाप्रिय ।
  अशेषं हर मे पापं वृक्षराज नमोऽस्तुते ॥
  मूले ब्रह्मा त्वचि विष्णुः शाखायां शङ्कर एव च ।
  पत्रे पत्रे सर्व देवानां वासुदेवाय ते नमः ॥

पीपलमा जल चढाउने :

- मूलतो ब्रह्मरूपाय मध्यतो विष्णुरुपिणे ।
  अग्रतः शिवरूपाय अश्वत्थाय नमोनमः ॥

कालसर्प योग भएकाहरूले नियमित पाठ गर्ने :

- अनन्तं वासुकि शेष पद्मनाभं च कम्बलम् ।
  शङ्खपालं धार्तराष्ट्रं तक्षकं कालियं तथा ॥
  एतानि नव नामानि नागानां च महात्मनाम्।
  सायंकाले पठेन्नित्यं प्रातः काले विशेषतः। ।
  तस्य विषभयन्नास्ति सर्वत्र विजयी भवेत् ।

नवग्रहस्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १

दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ २

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥ ३

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४

देवानांच ऋषिणांच गुरुंकांचन सन्निभं ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिं ॥ ५

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६

नीलांजनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥ ७

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥ ८

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९

इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ॥ १०

नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥११

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रुते न संशयः ॥१२

इति श्रीव्यासविरचितं नवग्रहस्तोत्रं सम्पूर्णम् ।

नवग्रहपीडाहरस्तोत्रम्

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।
विषमस्थानसम्भूतां पीडां हरतु मे रविः ॥१॥

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः ।
विषमस्थानसम्भूतां पीडां हरतु मे विधुः ॥२॥

भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।
वृष्टिकृद् वृष्टिहर्ता च पीडां हरतु मे कुजः ॥३॥

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥४॥

देवमन्त्री विशालाक्षः सदा लोकहिते रतः ।
अनेकशिष्यसम्पूर्णः पीडां हरतु मे गुरुः ॥५॥

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ।
प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः ॥६॥

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।

मन्दचारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥७॥

महाशिरो महावक्त्रो दीर्घद्रंष्ट्रो महाबलः ।
अतनुश्चोर्ध्वकेशश्च शतशोऽथ सहस्त्रशः ।
उत्पातरूपो जगतां पीडां हरतु मे तमः ॥८॥

इति ब्रह्माण्डपुराणोक्तं नवग्रहपीडाहरस्तोत्रं सम्पूर्णम् ॥

विशेष सन्ध्योपासनाविधिप्रकरण

विशेष सध्योपासनका लागि चाहिने आवश्यक सामग्रीहरूः
जलपात्र, लोटा, तिलक लगाउनलाई चन्दन, जपमाला, लगाउने माला, गोमुखी, आसन, गम्छा, भस्म, अर्घ्य दिने अर्घौतो, थाली, घण्टी, शङ्ख, फूल, चन्दन, कुशको औंठी ।

स्वस्तिवाचनम् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवाः।
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाᳪसस्तनूभिः।
व्यशेम देवहितं यदायूः।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः।

स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ।

प्रातः सन्ध्या

आचमनम् [१४]
ॐ ऋग्वेदाय नमः ॐ यजुर्वेदाय नमः
ॐ सामवेदाय नमः हस्तप्रक्षालनम्(हात धुने
ॐ अथर्ववेदाय नमः ।
अथवा
ॐ अच्युताय नमः ॐ माधवाय नमः ॐ केशवाय नमः
हस्त प्रक्षालनम् ॐ गोविन्दाय नमः ।

पवित्रीकरणम्
ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यान्तरः शुचिः ॥
(प्रातःकालमा पूर्वाभिमुखः भई शुद्धासनमा बसेर शिखाबन्धन, पवित्रधारण गरेर भस्मलेपन वा कुनै चन्दन लगाएर सन्ध्योपासन शुरु गर्नुपर्छ ।

आसनपवित्रकरणम्
विनियोगः

[१४] गोकर्णाकृति हस्तेन माषमात्रं जलं पिवेत् ।
ततो न्यूनाधिकं पीत्वा सुरापानी भवेद् द्विवः ॥ देवीभागवत् ।

ॐ पृथ्वीति मन्त्रस्य मेरूपृष्ठऋषिः, सुतलं छन्दः, कूर्मो देवता आसन-पवित्रकरणे विनियोगः ॥

आसनशुद्धि मन्त्रः

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

शिखाबन्धनम् (शिखा बाँध्ने)

चिद्रूपिणि । महामाये ! दिव्यतेजसमन्विते ।
तिष्ठ देवि । शिखामध्ये तेजोवृद्धिं कुरुष्व मे ॥

मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्नुद्र भामिनो बधीर्हविष्मन्तः सदमित्त्वा हवामहे ।

भस्माभिमन्त्रणम्

ॐ अग्निरिति भस्म । ॐ वायुरिति भस्म ।
ॐ जलमिति भस्म । ॐ स्थलमिति भस्म ।
ॐ व्योमेति भस्म । ॐ सर्वं वा इदं भस्म ।
ॐ मन एतानि चक्षूषि भस्मानीति ।

भस्म धारणम्

ॐ त्र्यायुषं जमदग्नेरिति ललाटे ।

ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ।

ॐ यद्देवेषु त्र्यायुषमिति दक्षिणेशे ।

ॐ तन्नो अस्तु त्र्यायुषमिति हृदये ।

तिलक धारणम्(चन्दन लगाउने । भस्ममाथि चन्दन लगाउनुहुँदैन ।)

चन्दन लगाउने मन्त्रः

चन्दनस्य महत्पुण्यं पवित्रं पापनाशनम् ।
आपदं हरते नित्यं लक्ष्मीस्तिष्ठति सर्वदा ॥

पवित्रधारणम्

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवः उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

अथ सङ्कल्प :

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ
विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्थ विष्णोराज्ञया प्रवर्तमानस्यसकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत हिमवद्दक्षिणपार्श्वे हिमवत्खण्डे, केदारखण्डे, मानसखण्डे, श्रीमद्ब्रह्माविष्णुप्रजापतिक्षेत्रे, पाशुपतक्षेत्रे, मुक्तिक्षेत्रे, रुरुक्षेत्रे, वराहक्षेत्रादिपुण्यक्षेत्रसमन्विते, मानसरोवर-इन्द्रसरोवर-रुद्रसरोवर-दामोदरनीलकण्ठ भैरव-नागकुण्डादिपावितस्थले, शैलेश्वरी-पञ्चकुमारी-अष्टकुलनागरक्षिते, सप्तकर्णाली-सप्तगण्डकी-सप्तकौशिकी-वाग्मती-विष्णुमती-अष्टविनायक-अष्टभैरव-रुद्रमती-ब्रह्मपुत्रतृष्ठादिनदनदीनां परमपवित्रजलपाविते देवघट्ट-गजेन्द्रमोक्ष-स्वर्गद्वारी-जनकपुरधाम-वैद्यनाथधाम विराजिते सिद्धनाथ-मत्स्येन्द्रनाथ-गोरखक्षनाथ-वैद्यनाथ-चन्दननाथ-स्वयम्भूनाथादि संरक्षिते गोकर्णेश्वरविराजिते अन्नपूर्ण-गणेश-मत्स्यपुच्छ-गौरीशङ्कर-धवलागिरी-कञ्चनजंघा-सगरमाथादि
हिमशैलविराजिते, शालग्राम वाणलिङ्गप्रतिष्ठिते, गुह्यकाली-दक्षिणकाली-दन्तकाली-भद्रकाली-श्वेतकाली उग्रकाली- रक्तकाली-गोरक्षकाली- मनकामना-त्रिपुरसुन्दरी-वाराही-प्रस्थम्भरा-अन्नपूर्णा-उग्रतारा-सप्तमालिकादिसुपूजिते, नेमुनिना पालिते राष्ट्रदेवपशुपतिनाथसनाथिते नेपालदेशे गोरक्षराष्ट्रे कौलक्षेत्रे, इह पुण्यभूमौ बौद्धावतारे षष्टिसंवत्सराणां मध्ये ......ऋतौ महामाङ्गल्यफलप्रदमासोत्तमे .... मासे योगे करणे राशिस्थिते श्रीसूर्ये

राशिस्थिते देवगुरौ अन्येषु शेषेषु ग्रहेषु ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अद्येह ....नाम्नि संवत्सरे .... अयने पक्षे तिथौ वासरे राशिस्थिते चन्द्रमसि राशिस्थानस्थितेषु सत्सु एवं गोत्रः .....प्रवरः .....वेदाध्यायी .... नामाहं ममोपात्तदुरितक्षयार्थ (मम कायिक, वाचिक, मानसिक, ज्ञाताः ज्ञात सकलदोष परिहारार्थं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थ) प्रातः / मध्याह्न / सायं / सन्ध्योपासनं अहं करिष्ये ।

भूत शुद्धि

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तुभूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन सन्ध्याकर्म समारभे ॥

अनेन मन्त्रेण वामपाद पार्शिना त्रिवारं भूमिताड़येत् ।

अभिषेक(मार्जन)

ॐ भूः पुनातु शिरसि । ॐ भुवः पुनातु नेत्रयोस् ।
ॐ स्वः पुनातु कण्ठे । ॐ महः पुनातु हृदये ।
ॐ जनः पुनातु नाभ्याम् । ॐ तपःपुनातु पादयोः । ॐ सत्यं पुनातु पुनः शिरसि । ॐ खं ब्रह्म पुनातु सर्वत्र ।

पुनः आचमनम्

विनियोगः

ॐ ऋतं चेति मधुच्छन्दसोऽघमर्षण ऋषिनुष्टुप् छन्दो भाववृतं दैवतमपामुपस्पर्शने विनियोगः ।

ॐ ऋतं च सत्यञ्चाभीद्धातोः ध्यजायत ततो । रात्र्यजायत । ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।

दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।ऋ १०।१९०।१ ।

ततो वारिणात्मानं वेष्टयित्वा सप्रणवगायत्र्या रक्षां कुर्यात्
(दायाँ हातको अञ्जुलीमा जल लिए वायाँ हातले छोपी तीनपटक गायत्री जपेर जल अभिमन्त्रित् गरी आफ्नो रक्षाको लागि शिर वरिपरि हातमा रहेको जल धारा दिँदै घुमाउने ।)

विनियोगः

ॐ अन्तश्चरसीति तिरश्चिन ऋषिरनुष्टुप् छन्दः आपो देवता अपामुपस्पर्शने विनियोगः ।

आचमनमन्त्रः

अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखम् ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतिरसोऽमृतम् ।
(तीनपटक आचमन गर्नु ।)

विनियोगः-

ॐ कारस्य ब्रह्मा ऋषिर्दैवी गायत्रीछन्दोग्निः परमात्मा देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः ।

ॐ सप्तव्याहृतीनां विश्वामित्र-जमदग्नि-भरद्वाज गौतमात्रि-वशिष्ठ-कश्वपा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहती -पंक्ति-त्रिष्टुभजगती–छन्दांस्यग्नि, वायु-आदित्यबृहस्पति-वरुणेन्द्र-विष्णु, विश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः ।
ॐ तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवताग्निमुखमुपनयने प्राणायामे विनियोगः ।

ॐ आपो ज्योतिरिति शिरसः प्रजापतिऋषिः त्रिपदा गायत्री छन्दो ब्रह्माग्निवायुसूर्या देवताः यजुः प्राणायामे विनियोगः ।

प्राणायाममन्त्रः

ॐ भूः ॐ भुवः ॐ स्वःॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ आपो ज्योतिरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ (तै.आ.प्र १०।२७)
पूरकः कुम्भकः रेचकः

पुनः आचमनम्

विनियोगः-

ॐ सूर्यश्चमेति ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः ।

आचमनम् (पहिलेझैँ आचमन गर्ने)

ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युक्तेभ्यः पापेभ्यो रक्षन्ताम् यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु । यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा । तै.आ.प्र. १०/२५ ।

मार्जनम् (कुशाग्र भागेन)

ॐ भूः पुनाति शिरसि ।
ॐ भुवः पुनातु नेत्रयोः ।
ॐ स्वः पुनातु कण्ठे ।
ॐ महः पुनातु हृदये ।
ॐ जनः पुनातु नाभ्याम् ।
ॐ तपः पुनातु पादयोः ।
ॐ सत्यं पुनातु शिरसि ।
ॐ खं ब्रह्म पुनातु सर्वत्र ।

विनियोगः-

ॐ आपोहिष्ठेत्यादित्र्यृचस्य सिन्धुद्वीप ऋषिः आपो देवता गायत्री छन्दः मार्जने विनियोगः ।

ॐ आपो हि ष्ठा मयो भुवः। ॐ ता नऽऊर्जे दधातन ।
ॐ महेरणाय चक्षसे । ॐ योवः शिवतमो रसः ।
ॐ तस्य भाजयतेह नः । ॐ उशतीरिव मातरः ।
ॐ तस्माः अरङ्गमामवः। ॐ यस्य क्षयाय जिन्वथ । (भूमि)
ॐ आपोजनयथा च नः ।

अघमर्षणम्
विनियोगः-
ॐ द्रुपदादिवेत्यस्य कोकिलो राजपुत्र ऋषिरनुष्टुप्छन्द आपो देवताः सौत्रामण्यबभृथे(अघमर्षणे)शिरसेके विनियोगः ।

ॐ दुपदादिवमुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ यजु २०/२० (शिरं सिञ्च्य)

विनियोगः-
ॐ ऋतञ्च सत्यञ्चेति सूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवता पापपुरुषनिरसने विनियोगः ।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्वान्तरिक्षमथो स्वः ॥
(दायिने हातमा राखेको जल ।नसिकाको अग्रभाग नजिक राखेर निम्न मन्त्र पढ्दै नासिकाको देब्रे भागबाट श्वास तानी उक्त श्वासलाई दायिन नासिका द्वारबाट बाहिर ल्याई उक्तपानी छोड्ने र नहेरि मन्त्र पढ्दै वायाँतिर फ्याँकिदिने ।

आचमनस्य विनियोगः
ॐ अन्तश्चरसीति तिरश्चिन ऋषिरनुष्टुप् छन्दः आपो देवता अपामुपस्पर्शने विनियोगः ।

ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखम् । त्वं यज्ञस्त्वं वषट्कार आपोज्योतिरसाऽमृतम् ।(आचम्य)

सूर्यार्घ्यंस्य विनियोगः
ॐ कारस्य ब्रह्मा ऋषिर्गायत्री छन्दः परमात्मा देवता ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिऋषिः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता ।

ॐ तत्सवितुरित्यस्य विश्वामित्रऋषिः सविता देवता गायत्री छन्दः प्रातकाले सूर्यार्घ्यदाने विनियोगः ।

त्रिवारं सूर्यार्घ्यदानम् :

ॐ भूभुवः स्वः ॐ तत्सवितुवरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् । ॐ आपोज्योति रसोऽमृतं ब्रह्म मूर्भुवः स्वरोम् ॐ ब्रह्म स्वरूपिणे सूर्यनारायणाय नमः इदमर्घ्य दत्तं नममः ।
ब्रह्मास्त्रेण सूर्यारि सस्रहनहन फट् (मुखनासिकाचक्षुश्रोत्रंपृसेत्)

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् । ॐ परोरजसेसा वदोम् (ॐ रुद्रस्वरूपि सूर्य नारायणाय इदमर्घ्यं दत्तं नममः । **ॐ ब्रह्म दण्डेन सूर्यारि वाजीन हनहन फट् ।** (मुखनासिक चक्षु श्रोत्रं पृसेत् ।

ॐ भूभुवः स्वः ॐ तत्सवितुर्वरेण्यं भगोदेवस्य धीमहि धियो योनः प्रचोदयात् । ॐ आपोज्योति रसोऽमृतं ब्रह्मभूभुवः स्वरोम् ।
विष्णुस्वरूपिणे सूर्य नारायणाय इदं अर्घ्यं दत्तं नममः ।
ब्रह्मशीर्षेण सूर्यारि शिर हन हन फट् । ॐ आसावादित्यो ब्रह्म ।

ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् । अनेन प्रदक्षिणवदुदकंक्षिपेत् ।

सूर्योपस्थानम्

विनियोगः

ॐ उद्वयमित्यस्य हिरण्यस्तुपऋषिः गायत्रीछन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ।

ॐ चित्रंदेवानामित्यस्य कुत्साङ्गिरस ऋषिः त्रिष्टुप्छन्दः,सूर्योदेवता सूर्योपस्थाने विनियोगः ।

ॐ उदुत्यमिति प्रस्कण्वऋषिर्गायत्री छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ।

ॐ तच्चक्षुरित्यस्य दध्यङ्ङथर्वणऋषिः रक्षरातीतपुर उष्णिक्छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः ।

मन्त्राः

ॐ उद्वयन्तमसस्परि स्वः पश्यन्तात्ऽउत्तरम् । देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥

ॐ उदुत्यञ्जातवेदसन्देवं बहन्ति केतवः । दृशे विश्वाय सूर्यम् ।

ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षऍंसूर्यआत्मा जगतस्तस्थुषश्च ॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदःशतञ्जीवेम शरदः शतऍंशृणुयाम शरदः शतम्प्रबवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥

गायत्रीषडङ्गन्यासः

अङ्गन्यासः

ॐ भूः हृदयायं नमः । ॐ भुवः शिरसे स्वाहा ।
ॐ स्वः शिखायै वषट् । ॐ तत्सवितुवरेण्यं कवचाय हुं ।
ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् । ॐ धियोयोनः प्रचोदयात् अस्त्राय फट् ।

करन्यासः

ॐ भूः अङ्गुष्ठाभ्यां नमः । ॐ भुवः तर्जनीभ्यां नमः ।
ॐ स्वः मध्यमाभ्यां नमः । ॐ तत्सवितुवरेण्यं अनामिकाभ्यां नमः ।

ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां नमः ।
ॐ धियोयोनः प्रचोदयात् करतलकरपृष्टाभ्यां नमः ।

ऋषिन्यासः

ॐ विश्वामित्र ऋषये नमः शिरसि ।
ॐ गायत्रीछन्दसे नमः मुखे ।
ॐ सविता देवतायै नमः हृदि
ॐ भू बीनाय नमः नाभौ ।
ॐ भुवः शक्तये नमः पादयोः ।
ॐ स्वः किलकाय नमः सर्वाङ्गे ।

व्याहृति न्यासः

ॐ भूः पादाभ्यां नमः ।
ॐ भुवः जानुभ्यां नमः ।
स्वः कटिभ्या. नमः ।
ॐ महः नाभ्यै नमः ।
ॐ जनः हृदयाय नमः ।
ॐ तपः कण्ठाय नमः ।
ॐ सत्यं ललाटाय नमः ।

हृदयादि न्यासः

ॐ ब्रह्मणे हृदयाय नमः । ॐ विष्णवे शिरसे स्वाहा ।
ॐ रुद्राय शिखायै वषट् । ॐ ईश्वराय कवचाय हुँ ।
ॐ सदाशिवाय नेत्रत्रयाय वौषट् । ॐ सर्वात्मने अस्त्राय फट् ।

वर्ण न्यासः

ॐ **तत्** पादाङ्गुलिभ्यां नमः । ॐ **स** गुल्फाभ्यां नमः ।
ॐ **वि** जङ्घाभ्यां नमः । ॐ **तु** जानुभ्यां नमः ।
ॐ **र्व** उरुभ्यां नमः । ॐ **रे** गुदाय नमः ।
ॐ **णि** लिङ्गाय नमः । ॐ **यं** कट्यै नमः ।

ॐ **भ** नाभ्यै नमः । ॐ **र्गो** हृदयाय नमः ।
ॐ **दे** स्तनाभ्यां नमः । ॐ **व** हृदयाय नमः ।
ॐ **स्य** कण्ठाय नमः । ॐ **धी** मुखाय नमः ।
ॐ **म** तालवे नमः । ॐ **हि** नासिकायै नमः ।
ॐ **धि** नेत्राभ्यां नमः । ॐ **यो** भ्रुभ्यां नमः ।
ॐ **यो** ललाटाय नमः । ॐ **न** पूर्वमुखाय नमः ।
ॐ **प्र** दक्षिणमुखाय नमः । ॐ **चो** पश्चिममुखाय नमः ।
ॐ **द** उत्तरमुखाय नमः । ॐ **या** मुर्ध्ने नमः
ॐ **त्** व्यापकाय नमः ।

गायत्री न्यासः

ॐ तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् । वरेण्यं कटिदेशन्तु नाभिं भर्गस्तथैव च ॥ देवस्य मे तु हृदयं धीमहीति गलं तथा । धियो मे पातु जिह्वायां तत्पदं पातु लोचने ॥ ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् ॥ देवीभागवत १२।०३ ।

प्रातः कालीन ब्रह्मरूपा गायत्री ध्यानावाहनम् ।

ध्यानम्

ॐ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा ।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता ॥

आदित्यमण्डलस्था च ब्रह्मलोकगताऽथवा ।
अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥ नित्यकर्मविधि।

बालां विद्यां तु गायत्रीं लोहितां चतुराननाम् ।
रक्तम्बरद्वयोपेतामक्षसूत्रकरां तथा ॥

कमण्डलुधरां देवीं हंसवाहनसंस्थिताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥

मन्त्रेणावाहयेद्देवीमायान्तीं सूर्यमण्डलात् ।
आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥

गायत्रि छन्दसां मातर्ब्रह्मयोने नमोऽस्तुते ॥

गायत्री आवाहनम्

विनियोग :-

ॐ तेजोऽसीति देवा ऋषयो गायत्री छन्दःशुक्रं दैवतं गायत्र्यावाहने विनियोगः ।

आवाहनमन्त्रः

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि । प्प्रियं देवानामनाधृष्टं देवयजनमसि ॥ यजुर्वेद१।३१ ।

आगच्छ वरदे देवि ! गायत्रि ! ब्रह्मरूपिणि ।
जपानुष्ठान सिध्यर्थं प्रविश्य हृदयं मम ॥ देवीभागवत ।

गायत्र्युपस्थानम्

विनियोगः-

ॐ तुरीयस्य विमल ऋषिः परमात्मा देवता गायत्री छन्दः गायत्र्युपस्थाने विनियोगः ।

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे ।
नमस्ते तुरीयाय दर्शताय पदाय परो रजसेऽसावदो मा प्रापत् ॥

गायत्रीध्यानम्

ॐ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै
र्युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशा शुभं कपालं गुणं,
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

प्रातः कालिकं ध्यानम्

ब्रह्माणी चतुराननाक्षवलयं कुम्भं करैः स्रुक्स्रुवौ
विभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका ।
हंसारोहणकेलिरम्बर मणेबिंम्बाञ्चिता भूषिता

गायत्री हृदि भाविता भवतु नः सम्पत्समृद्ध्यै सदा ॥

मध्याह्नकालिकं ध्यानम्

रुद्राणी नवयौवना त्रिनयना वैयाधचर्माम्बरा
खट्वाङ्गत्रिशिखाक्षसूत्रवलयाभीतिर्दधानाम्बिका ।
विद्युत्पुञ्जजटाकलापविलसवालेन्दुमौलिः सदा
सावित्री वृषवाहना सिततनुध्येया यजूरूपिणी ॥

सायङ्कालिकं ध्यानम्

वृद्धा नीलघनप्रभापरिलसत्पीताम्बरा भूषिता
दिव्यैराभरणैरथाङ्गकमले शवं गदां बिभ्रती ।
तार्क्षस्कन्धगता समस्तजगदाराध्या परा वैष्णवी,
ध्येया चैव सरस्वती भगवती सामस्वरूपा सदा ॥

शापविमोचनम्

विनियोग :
ॐ अस्य श्रीब्रह्मशापविमोचन मन्त्रस्य ब्रह्मा ऋषि भुक्तिमुक्तिप्रदा ब्रह्मशापविमोचने गायत्री शक्तिर्देवता गायत्री छन्दो ब्रह्मशापविमोचने विनियोगः ।
मन्त्रः
ॐ गायत्रीं ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः । तां पश्यन्ति धीराः सुमनसो वाचमग्रतः ॥
ॐ वेदान्तनाथाय विद्महे हिरण्यगर्भाय धीमहि तन्नो ब्रह्मः प्रचोदयात् ।
ॐ देवि ! गायत्रि ! त्वं ब्रह्मशापाद्विमुक्ता भव ॥

विनियोगः

ॐ अस्य श्रीवशिष्ठशापविमोचनमन्त्रस्य निग्रहानुग्रहकर्ता वशिष्ठ ऋषिर्वशिष्ठानुगृहिता गायत्री शक्तिर्देवता विश्वोद्भवा गायत्री छन्दः वशिष्ठशापविमोचनार्थं जपे विनियोगः ॥

मन्त्रः

ॐतत्वानि चाङ्गेष्वग्निचितो धियांसः ध्यायन्तिविष्णोरायुधानि विभ्रमत् ।
जनानतासोपरमं च शश्वत् । गायत्री मासाच्छुरनुत्तमं च धामः ।
ॐ सोऽहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः ।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसोऽस्म्यहम् ॥
योनिमुद्रां प्रदर्श्य गायत्री त्रयं पठेत् ।
ॐ भो देवि । गायत्रि । त्वं वशिष्ठशापाद्विमुक्ता भव ॥

विनियोगः

ॐ अस्य श्रीविश्वामित्रशापविमोचनमन्त्रस्य नूतनसृष्टिकर्ता विश्वामित्र ऋषिर्विश्वामित्रानुगृहीता गायत्री शक्तिर्देवता वाग्देहा गायत्री छन्दः विश्वामित्रशापविमोचनार्थं जपे विनियोगः ।

मन्त्रः

ॐ गायत्री भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवाः ।
देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये ॥
ॐ यन्मुखान्निःसृतो खिलवेदगर्भः ॥

ॐ देवि ! गायत्रि ! त्वं विश्वामित्रशापाद्विमुक्ता भव ॥
शापयुक्ता तु गायत्री सफला न कदाचन ।
शापादुत्तारिता सा तु भुक्तिमुक्तिफलप्रदा ॥

शुक्रशाप विमोचनम्

ॐ शुक्रशापविमोचनमन्त्रस्य श्रीशुक्र ऋषिः अनुष्टुप् छन्दः देवी गायत्री देवता शुक्रशापविमोचनार्थे जपे विनियोगः ।
मन्त्रः सोऽहमर्कमयं ज्योतिरहं शिवः ।

आत्माज्योतिरहं शुक्रः सर्वज्योति रसोऽस्म्यहम् ।

ॐ देवि ! गायत्रि ! शुक्रशापाद्विमुक्ता भव ।

गौतमशाप विमोचनम्

ॐ अस्य श्रीद्विज गौतमशापविमोचनमन्त्रस्य निग्रहानुकर्ता गौतमऋषिः प्रकृतिछन्दः गणेशदेवता द्विजगौतम शाप विमोचनार्थे दशप्रणवजपे विनियोगः । ॐ १० ।

अहोदेवि । महादेवि । सन्ध्ये विद्ये सरस्वति ।
अजरे । अमरे । चैव ब्रह्मयोनिर्नमोऽस्तु ते ॥

ॐ देवि । गायत्रि । त्वं ब्रह्मशापाद्विमुक्ता भव,
ॐ देवि । गायत्रि । त्वं वशिष्ठशापाद्विमुक्ता भव ।
ॐ देवि । गायत्रि । त्वं विश्वामित्रशापाद्विमुक्ता भव ।
ॐ देवि । गायत्रि । त्वं शुक्रशापाद्वमुक्ता भव ।
ॐ देवि । गायत्रि । त्वं द्विजगौतमशापाद्विमुक्ता भव ।
ॐ देवि गायत्रि द्विज गौतमशापाद्विमुक्ता भव ।

अथ श्रीगायत्रीहृदयम्

विनियोगः

ॐ अस्य श्रीगायत्रीहृदयस्य नारायण ऋषिर्गायत्री छन्द परमेश्वरी गायत्री देवता गायत्रीहृदयजपे विनियोगः ।

अथ अङ्गन्यासः-

द्यौर्मुध्निदैवतम् । दन्तपंक्तावश्विनौ । उभे सन्ध्ये चोष्ठौ । मुखमग्निः । जिह्वा सरस्वती । ग्रीवायां तु बृहस्पतिः । स्तनयोर्वसवोऽष्टौ । बाह्वोर्मरुतः । हृदये पर्जन्यः । आकाशमुदरम् । नाभावन्तरिक्षम् । कट्योरिन्द्राग्नी । जघने विज्ञानघनः प्रजापतिः । कैलाशमलवे उरः । विश्वेदेवा जान्वोः । जङ्घायां कौशिकः । गुह्यमयने

। उरु पितरः । पादौ पृथ्वी । वनस्पतयोऽङ्गुलिषु । ऋषयो रोमाणि । नखानि मुहूर्त्तानि । अस्थिषु ग्रहाः । असृङ्मास ऋतवः । संवत्सरा वै निमिषम् । अहोरात्रावादित्यश्चन्द्रमाः । प्रवरां दिव्यां गायत्रीं सहस्रनेत्रां शरणमहं प्रपद्ये । ॐ तत्सवितुर्वरेण्याय नमः । ॐ तत्पूर्वा जयाय नमः । ॐ तत्प्रातरादित्याय नमः । ॐ तत्प्रातरादित्यप्रतिष्ठायै नमः । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । सायं प्रातरधीयानोऽपापो भवति । सर्वतीर्थेषु स्नातो भवति । सर्वेदेवैर्ज्ञातो भवति। अवाच्यवचनात्पूतो भवति । अभक्ष्यभक्षणात्पूतो भवति । अभोज्यभोजनात्पूतो भवति । चोष्यचोषणात्पूतो भवति । असाध्यसाधनात्पूतो भवति । दुष्प्रतिग्रह शतसहस्रात्पूतो भवति । सर्वप्रतिग्रहात्पूतो भवति । पङ्क्तिदूषणात्पूतो भवति । अनृतवचनात्पूतो भवति । अथाऽब्रह्मचारी ब्रह्मचारी भवति । अनेन हृदयेनाधीतेन क्रतुसहस्रेणेष्टं भवति । षष्ठिशतसहस्रा गायत्र्या जप्यानि फलानि भवन्ति । अष्टौ ब्राह्मणान् सम्यग्ग्राहयेत्। तस्य सिद्धिर्भवति । य इदं नित्यमधीयानो ब्राह्मणः प्रातः शुचिः सर्वपापैः प्रमुच्यते इति । ब्रह्मलोके महीयते । इत्याह भगवान् श्रीनारायणः । देवीभागवते ।

प्रातः कालीन ध्यानम्

गायत्रीं त्र्यक्षरां बालां साक्षासूत्रकमण्डलुम् ।
रक्तवस्त्रां चतुर्वक्रां हंसवाहनसंस्थिताम् ॥१

ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ।
आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् ॥२

आगच्छवरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्री छन्दसां मातर्ब्रह्मयोने कमोऽस्तु ते ॥३ कात्यायन, धर्मसिन्धौ ।

ॐ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा ।
श्वेतैर्विलेपनैः पुष्पै रलङ्कारेश्च भूषिता ॥४

आदित्य मण्डलस्थाच ब्रह्मलोक गताथवा ।
अक्षसूत्र धरादेवी पद्मासनगताथवा ॥५

ॐ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै
र्युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशा शुभं कपालं गुणं
शङ्खं चक्रमषारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥६

मानसिक पूजा

ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि गायत्र्यै नमः ।
ॐ हं आकाशात्मकं पुष्पं समर्पयामि गायत्र्यै नमः ।
ॐ यं वाय्वात्मकं धूपं समर्पयामि गायत्र्यै नमः ।
ॐ रं तेजात्मकं दीपं दर्शयामि गायत्र्यै नमः ।
ॐ वं अमृतात्मकं नैवेद्यं निवेदयामि गायत्र्यै नमः ।
ॐ यं रं लं वं हं सर्वात्मकं पुष्पाञ्जलिं समर्पयामि गायत्र्यै नमः । (देवी भागवत)

जपादौ चतुर्विंशतिर्मुद्राः

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा ।
द्विमुखं त्रिमुखं चैव चतुष्पञ्चमुखं तथा ॥१

षण्मुखाः धोमुखं चैव व्यापकाञ्जलिकं तथा ।
शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखम् ॥२

प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम् ।
सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ॥३
एता मुद्राश्चतुर्विंशज्जपादौ सम्प्रदर्शयेत् ॥४

चित्र राख्ने ।

सुमुखम् सम्पुटम् ३. विततम् बिस्तृतम् ५. द्विमुखम् ६. त्रिमुखम् चतुर्मुखम् ८. पञ्चमुखम् ९. षण्मुखम् १०. अधोमुखम् ११. व्यापकाञ्जलिम् १२. शकटम् १३. यमपाशम् १४. प्रथितम् १५. उन्मुखोन्मुखम् १६. प्रलम्बम् १७. मुष्टिकम् १८ मत्स्यम् १९. कूर्मम्

२२. महाक्रान्तम् २०. बराहकम् २१. सिंहाक्रान्तम् २३. मुद्गरम्
२४. पल्लवम् ।

अक्षमालिका प्रार्थनाः

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥

ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥

ॐ ह्रीं अक्षमालिकायै नमः ।

प्रातकाले गायत्री विनियोगः

ॐ प्रातः सन्ध्या रक्ता रक्तपद्मासनस्था रक्ताम्बरधरा रक्तवर्णा रक्तगन्धानुलेपना चतुर्मुखा अष्टभुजाद्विनेत्रा दण्डाऽक्षमाला कमण्डलु, स्रुक्स्रुवधारिणी सर्वाभरणभूषिता गायत्री कौमारी ब्राह्मी हंसवाहिनी ऋग्वेदसंहिता ब्रह्मदेवत्या त्रिपदा गायत्री षट्कुक्षिः पञ्चशीर्षा अग्नि (मुखा रुद्र(शिव(विष्णुहृदया ब्रह्मकवचा सांख्यायन सगोत्रा मूर्लोक व्यापिनी अग्निस्तत्वम् **उदात्ताऽनुदात्तःस्वरितस्वरःमकारः आत्मज्ञाने जपे विनियोगः ।** इत्येषा गायत्री ।

ॐ प्रणस्य ब्रह्मा ऋषिः गायत्री छन्दः परमात्मा देवता शुक्लोवर्ण जपे विनियोगः ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिऋषिः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्नि-वायु-सूर्या देवताः गायत्री छन्दः सर्वपापक्षयार्थे गायत्रीमन्त्र जपे विनियोगः ।

ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता शुक्लोवर्ण अग्निमुखं ब्रह्मशिरो विष्णुहृदयं रुद्र कवचं परमात्मा शरीरं सङ्ख्यायन षट्स्वरा सरस्वती जिह्वा पिङ्गाक्षी त्रिपदा गायत्री सवितु प्रितये जपे विनियोगः ।

ध्यानम्

बाला विद्यान्तु गायत्री लोहिता चतुराननाम्
रक्ताम्बरद्वयोपेतामक्षसूत्रकरां तथा ॥
कमण्डलुधरा देवि हंसवाहनसंस्थिताम् ।
ब्रह्माणी ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥
मन्त्रेणवाहयेद्देवीमायान्ती सूर्यमण्डलात् ॥

ब्रह्मगायत्रीमन्त्रः

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

त्रिपदा गायत्री :

२४ अक्षरको गायत्री ८ ८ अक्षरमा विभक्त हुँदा त्रिपदा बनेको हो । चतुर्थ पाद वा तुरीय पद परोरजसे सावदोम हो । ॐ भूर्भुवः स्वः यो व्याहृति हो । यसबाहेक ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् । यी तीन गायत्रीका त्रिपाद हुन् ।

पञ्चप्रणवयुक्त गायत्री

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ परोरजसे सावदोम् ।

गायत्री जपारम्भः

मालया वा करमालया जपम्

जप निवेदनम्

ॐ देपागातुविद इत्यस्य मनसस्पतिऋषिः वातो देवता विराट् छन्दः जपनिवेदने विनियोगः ।

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पतऽइमन्देव यज्ञŲ'स्वाहा वातेधाः ॥

प्रार्थयेत्

यदक्षरपदभ्रष्टं मात्राहीनं च यद्‌भवेत्‌ ।
तत्सर्वं क्षम्यतां देवि काश्यपप्रियवादिनि ॥

जपान्ते उत्तराङ्ग अष्टमुद्रा

सुरभिज्ञानवैराग्यं योनि:: शंखोऽथ पङ्कजम्‌ ।
लिङ्गंनिर्वाणकं चैव जपान्तेःऽष्टौ प्रदर्शयेत्‌ ॥

चित्र राख्ने:
(१) सुरभि: (२) ज्ञानम्‌ (३) वैराग्यम्‌ (४) योनि:
(५) शंख: (६) पङ्कजम्‌ (७) लिङ्गम्‌ (८) निर्वाणम्‌

पुनराचमनम्‌ ।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मनावन नु:सृत: स्वभावात्‌ ।
करोमि यद्‌यद्‌ सकलं परस्मै नारायणयेति समर्पयामि ।
आसन नजिक जल छोडेर त्यही जल शिरमा लाउने[१५]
ॐ शक्राय नम: ।

गायत्रीतर्पण[१६] विनियोग: केवल प्रात: संध्यायाम्‌

---

[१५] यस्मिन्‌ स्थाने जपं कुर्यात्‌ शक्रो हरति तज्जपम्‌ ।
तन्मृदा लक्ष्म कुर्वीत ललाटे तिलकाकृति: ॥ व्यासस्मृति: ।
[१६] **संध्यामि च होमं** च यावज्जीवं समाचरेत्‌ ।
नत्यजेत्‌ सूतके वापि त्यजन्‌ गच्छत्यधोगतिम्‌ ॥
सूतके मानसीं सन्ध्यां कुर्याद वै सुप्रयत्नत:। स्मृति समुच्चय

गायत्रीं दशधा जप्त्वा संध्याया: फलमाप्नुयात्‌ । स्मृति समुच्चय
गायत्री सम्यमुच्चार्य सूर्यायाय निवेदयेत्‌ ।
मार्जनंतु न वा कार्यमुपस्थानं न चैव हि । भारद्वाज आचारभूषण ।

विनियोगः

ॐ गायत्र्या विश्वामित्र ऋषिः सवता देवता गायत्री छन्दः गायत्रीतर्पणे विनियोगः ।

ॐ भूः ऋग्वेदपुरुषं तर्पयामि । ॐ भुवः यजुर्वेदपुरुषं तर्पयामि ।
ॐ स्वः सामवेदपुरुषं तर्पयामि । ॐ महः अथर्ववेद र्ववेदपुरुषं पुरुषं तर्पयामि ।
ॐ जनः इतिहास पुराणपुरुषं तर्पयामि । ॐ तपः सर्वागमपुरुषं तर्पयामि ।
ॐ सत्यं सत्यलोक पुरुषंतर्पयामि । ॐ भूः भूर्लोक पुरुषंतर्पयामि ।
ॐ भुवः भुवर्लोकपुरुषं तर्पयामि । ॐ स्वः स्वर्लोक पुरुषं तर्पयामि ।
ॐ भूः एकपदां गायत्रीं तर्पयामि । ॐ भुवः द्विपदां गायत्त्रीं तर्पयामि ।
ॐ स्वः त्रिपदां गायत्रीं तर्पयामि । ॐ भूर्भुवः स्वः चतुष्पदा गायत्रीं तर्पयामि ।
ॐ उषसीं तर्पयामि ॐ गायत्रीं तर्पयामि ॐ सावित्रीं तर्पयामि ।
ॐ सरस्वतीं तर्पयामि ॐ वेदमातरं तर्पयामि । ॐ पृथिवीं तर्पयामि ।
ॐ अजां तर्पयामि । ॐ कौषिकीं तर्पयामि । ॐ सांकृतिं तर्पयामि ।
ॐ सर्वाजितीं तर्पयामि ।ॐ गायत्रीं तर्पयामि । ॐ तत्सद् ब्रह्मार्पणमस्तु ॥ (देविभागवते ११.१७)

प्रार्थना

ॐ गायत्र्यै नमः । ॐ सावित्र्यै नमः ।
ॐ सरस्वत्यै नमः । ॐ सन्ध्यायै नमः ।

शान्तिपाठः

ॐ जातवेदसे सुनवाम सोममराति यतो नि दहाति वेदः । सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

पृथ्वी नमनम्

ॐ स्योना पृथिवि । नो भवा नृक्षरा निवेशनी । यच्छ्ानः शर्मसप्प्रथाः ॥

प्रदक्षिणा

यानि कानि च पापानि जन्मान्तर कृतानि च ।
तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे ॥

विनियोगः

देवागातु विदः इत्यस्य मनसस्पति ऋषिः वातो देवता विराट छन्दः जपनिवेदने विनियोगः ॥

मन्त्रः

ॐ देवा गातु विदो गातुं वित्त्व गातुमित । मनसस्पतइमन्देव यज्ञ स्वाहा व्वातेधाः ॥ यजु ८।२१।

प्रातः कालीन अभिवादनम्

अमुकगोत्रोत्पन्नोऽमुक प्रवरान्वितोऽहं
शुक्लयजुर्वेदान्तर्गतमाध्यान्दिनवाजसनेयशाखाध्यायी अमुकशर्माऽहं भो भारद्वाजगोत्रधारिणिब्रह्मरूपे गायत्रि ! त्वां अभिवादयामि ।

मध्याह्नकालीन अभिवादनम्

अमुकगोत्रोत्पन्नोऽमुक प्रवरान्वितोऽहं
शुक्लयजुर्वेदान्तर्गतमाध्यान्दिनवाजसनेयशाखाध्यायी अमुकशर्माऽहं भो काश्यपगोत्रधारिणिशिवरूपे सावित्री ! त्वां अभिवादयामि ।

सायंकालीन अभिवादनम्

अमुकगोत्रोत्पन्नोऽमुक प्रवरान्वितोऽहं शुक्लयजुर्वेदान्तर्गतमाध्यान्दिन–वाजसनेयशाखाध्यायी अमुकशर्माऽहं भो साङ्ख्ययनगोत्रधारिणि–विष्णुरूपे सरस्वति ! त्वां अभिवादयामि ।

क्षमाप्रार्थनाः

यदक्षरपदभ्रष्टं स्वरव्यञ्जनवर्जितम् ।

तत्सर्वं क्षम्यतां देवि कश्यपप्रियवादिनि ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरश्वरि ।
यत्पूजितं मया देवि पूरिपूर्णं तदस्तु मे ॥

सन्ध्याविसर्जनम्

ॐ उत्तरे शिखरे इत्यस्य कश्यपऋषिः सन्ध्यादेवता अनुष्टुप् छन्दः सन्ध्याविसर्जने विनियोगः ।

उत्तरे शिखरे देवि भूम्यां पर्वतमस्तके ।
ब्राह्मणेभ्यो विनिर्मुक्ता गच्छ देवि यथासुखम् ॥
ॐ अनेन सन्ध्योपासनाख्येन कर्मणा श्री परमेश्वर प्रीयतां न मम ।
ॐ ब्रह्मार्पणमस्तु ।

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्यूतम् ।
ॐ श्रीविष्णवे नमः ३

शिखामुक्ति

ब्रह्मपाशसहस्रेण रुद्रशूल शतेन च ।
विष्णुचक्रसहस्रेण शिखामुक्तिं करोम्यहम् ॥

भूमृत्तिका बन्धनम्

ॐ तत्सवितु.....मन्त्रेण तत्रत्यां मृदां धारयेत् ।

इति सन्ध्याविधि
सन्दर्भ पुस्तकहरूः

१. गायत्रीमञ्जरी १००८ गायत्रीस्वरूप ब्रह्मचारी वि.सं २०४६ राजा तारकबहादुर शाह प्रकाशक ।
२. नित्यकर्म
३.

सामान्य सन्ध्याविधिः
ॐ पृथिवीत्यस्य मेरुपृष्ठऋषिः कूर्मो देवता सुतलं छन्दः आसने विनियोगः ।
जलं भूमौ निक्षिप्यः अनेन मन्त्रेणः

आसनशुद्धिः
ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वञ्च धारय मां देवि पवित्र कुरु चासनम् ।

भूतशुद्धि :
अपसर्पन्तु ये भूता ये भूता भूमि दूषिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचा सर्वतोदिशम् ।
सर्वेषामविरोधेन सन्ध्याकर्म समारभे ।
वामपाद पार्ष्णिना त्रिवारं भूमिं ताडयेत् ।

भष्मधारणम्
व्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु व्यायुषन्तन्नोऽस्तु व्यायुषम् । अनेन भष्मधारणं कुयात् ।

अभिषेचनम्
ततः कुशोदकेन शिरसि अभिषिञ्चित्

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
ॐ पुण्डरीकाक्षः पुनातु इति आत्मानं सर्वत्र च अभिषिञ्चेत् ।

शिखाबन्धनम्
ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते ।

तिष्ठ देवि शिखाबन्धे तेजोबुद्धिं कुरुष्व मे ॥

ॐ मानस्तोके अनेन शिखाबन्धनं कुर्यात् ।

ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा न अश्वेषु रीरिषः। वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदामित् त्वा हवामहे ॥

रुद्राक्षमाला धारणम्

ॐ त्र्यम्बकं यजामहे इत्यादिना रुद्राक्षमालां धारयेत् ।
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

आचनम्

अच्यूताय नमः स्वाहा, ॐ माधवाय नमः स्वाहा,
ॐ केशवाय नमः स्वाहा । ब्रह्मतीर्थेन एतैर्जलं पिवेत् ।
ॐ गोविन्दाय नमः स्वाहा । इति हस्तप्रक्षालनम् ।

प्राणायामः

कनिष्ठिकाऽनाभिकाभ्यां वामनासापुटं संपीड्य दक्षिणेन वायुं पूरयेत् ।
ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्य
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् ।
ॐ आपोज्योतिरसोऽमृतं ब्रह्मभूर्भूवस्स्वरोम् । ॐ विष्णवे नमः ।

ततोऽङ्गुष्ठेन दक्षिणनासापुटं संपीड्य पूर्ववत् समग्रमन्त्रं पठित्वा
ॐ ब्रह्मणे नमः ।

ततः कनिष्ठिकाऽनाभिकाभ्यां विमुच्य वायुरेचयेत् ॐ भूः, ॐ भुवः, इत्यादि सम पठित्वा ॐ महेश्वराय नमः ।

सूर्यार्घ्यदानम्

ॐ भूभुवः स्वः ॐ तत्सवितुवरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् । ॐ आपोज्योति रसोऽमृतं ब्रह्म मूर्भुवः स्वरोम् ॐ ब्रह्म स्वरूपिणे सूर्यनारायणाय नमः इदमर्घ्य दत्तं नममः ।
ब्रह्मास्त्रेण सूर्यारि सस्त्रहनहन फट् (मुखनासिकाचक्षुश्रोत्रंपृसेत्)

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् । ॐ परोरजसेसा वदोम् (ॐ रुद्रस्वरूपि सूर्य नारायणाय इदमर्घ्यं दत्तं नममः । **ॐ ब्रह्म दण्डेन सूर्यारि वाजीन हनहन फट् । (मुखनासिक चक्षु श्रोत्रं पृसेत् ।**

ॐ भूभुवः स्वः ॐ तत्सवितुर्वरेण्यं भगोदेवस्य धीमहि धियो योनः प्रचोदयात् । ॐ आपोज्योति रसोऽमृतं ब्रह्मभूभुवः स्वरोम् ।
विष्णुस्वरूपिणे सूर्य नारायणाय इदं अर्घ्यं दत्तं नममः ।
ब्रह्मशीर्षेण सूर्यारि शिर हन हन फट् । ॐ आसावादित्यो ब्रह्म ।

सूर्योपस्थानम्

ॐ आकृष्णेन एवं तच्चक्षुर्देवहितं इत्यादिना सूर्योपस्थानं कुर्यात् ।

ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् ।

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येमशरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतम्। प्रब्रवाम शरद् शतमदीनाः स्याम शरदः शतम् भूयश्यच शरदः शतात् ।

गायत्री ध्यानम्

ॐ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखै स्त्रीक्षणै
र्युक्तामिन्दुकलानिबद्धमुकुटांतत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशा शुभ्रं कपालं गुणम्
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

इति ध्यात्वा गायत्रीं जपेत् ।

अक्षमालिका प्रार्थनाः

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥

ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥
ॐ ह्रीं अक्षमालिकायै नमः ।

प्रातकाले गायत्री विनियोगः

ॐ प्रातः सन्ध्या रक्ता रक्तपद्मासनस्था रक्ताम्बरधरा रक्तवर्णा रक्तगन्धानुलेपना चतुर्मुखा अष्टभुजाद्विनेत्रा दण्डाऽक्षमाला कमण्डलु, स्रुक्स्रुवधारिणी सर्वाभरणभूषिता गायत्री कौमारी ब्राह्मी हंसवाहिनी ऋग्वेदसंहिता ब्रह्मदेवत्या त्रिपदा गायत्री षट्कुक्षिः पञ्चशीर्षा अग्नि (मुखा रुद्र(शिव(विष्णुहृदया ब्रह्मकवचा सांख्यायन सगोत्रा मूर्लोक व्यापिनी अग्निस्तत्वम् **उदात्ताऽनुदात्तःस्वरितस्वरःमकारः आत्मज्ञाने जपे विनियोगः ।** इत्येषा गायत्री ।

ॐ प्रणस्य ब्रह्मा ऋषिः गायत्री छन्दः परमात्मा देवता शुक्लोवर्ण जपे विनियोगः ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिऋषिः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्नि-वायु-सूर्या देवताः गायत्री छन्दः सर्वपापक्षयार्थे गायत्रीमन्त्र जपे विनियोगः ।

ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता शुक्लोवर्ण अग्निमुखं ब्रह्मशिरो विष्णुहृदयं रुद्र कवचं परमात्मा शरीरं सङ्ख्यायन षट्स्वरा सरस्वती जिह्वा पिङ्गाक्षी त्रिपदा गायत्री सवितु प्रितये जपे विनियोगः ।

गायत्रीजपमन्त्रः

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

पञ्चप्रणवयुक्त गायत्री :

ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेणीयं ॐ भर्गोदेवस्य धीमहि ॐ धियोयो नः प्रचोदयात् । ॐ परोरजसेसावदोम् ।

इति १० बारम् २८, ५४, १०८ यथा शक्यम् अवश्यमेव जप्यम् । जपान्ते आचमनं कृत्वा विसर्जयेत् ।

विसर्जनम्

ॐ उत्तरे शिखरे देवि भूम्यां पर्वतमस्तके ।
ब्राह्मणेभ्यो विनिर्मुक्ता गच्छ देवि यथा सुखम् ॥

प्रदक्षिणा :

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे परे ॥

क्षमा प्रार्थना

यदक्षरं पदंभ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्व क्षम्यतां देवि प्रसीद परमेश्वरी ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥

अनेन प्रातः सन्ध्योपासनाख्येन कर्मणा अथवा यथाशक्ति गायत्रीमन्त्रजपाख्येन कर्मणा श्री परब्रह्मीवरूपिणी गायत्री प्रयतां न मम । ॐ तत्सत् ब्रह्मार्पणमस्तु ।

सन्ध्या विसर्जनम्

विनियोगः

ॐ उत्तमे शिखरे' इत्यस्य वामदेव ऋषिरनुष्टुप् छन्दः गायत्री देवता गायत्रीविसर्जने विनियोगः ।

ॐ उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि ! यथासुखम् ॥

अशक्तौ तु :
अत्यन्ताशक्तौ तु १० बारमेवापि जपेत् ।
एतदवस्थायां भस्मधारणं, शिखाबन्धनं, कुशोदकेन षेचनं विधाय आचम्य प्राणानायम्य सूर्यार्घ्यं प्रदाय गायत्रीमन्त्रजपं कुर्यात् ।

इति विसर्जनम् ।

इति संक्षिप्त सन्ध्या प्रयोगः

अथ श्रीगायत्रीकवचम्

विनियोग :-
ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्मा ऋषिर्गायत्री छन्दो गायत्री देवता ॐ भूः बीजम्, भुवः शक्तिः, स्वः कीलकम्, गायत्रीप्रीत्यर्थं जपे विनियोगः ।

गायत्रीध्यानम्
ॐ पञ्चवक्त्रां दशभुजा सूर्यकोटिसमप्रभाम् ।
सावित्रीं ब्रह्मवरदां चन्द्रकोटिसुशीतलाम् ॥१

त्रिनेत्रां सितवक्त्रां च मुक्ताहारविराजिताम् ।
वराऽभयाङ्कुशकशाहेमपात्राक्षमालिकाम् ॥२

शङ्खचक्राब्जयुगलं कराभ्यां दधतीं पराम् ।
सितपङ्कजसंस्थां च हंसारूढां सुखस्मिताम् ॥३

ध्यात्वैवं मानसाम्भोजे गायत्रीकवचं जपेत् ॥४

ब्रह्मोवाच

ॐ विश्वामित्र ! महाप्राज्ञ ! गायत्रीकवचं शृणु ।
यस्य विज्ञानमात्रेण त्रैलोक्यं वशयेत् क्षणात् ॥५

सावित्री मे शिरः पातु शिखायाममृतेश्वरी ।
ललाटं ब्रह्मदैवत्या भ्रुवौ मे पातु वैष्णवी ॥६

कर्णौ मे पातु रुद्राणी सूर्या सावित्रिकाऽम्बिके ।
गायत्री वदनं पातु शारदा दशनच्छदौ ॥७

द्विजान् यज्ञप्रिया पातु रसनायां सरस्वती ।
सांख्यायनी नासिकां में कपोलौ चन्द्रहासिनी ॥८

चिबुकं वेदगर्भा च कण्ठं पात्वघनाशिनी ।
स्तनौ मे पातु इन्द्राणी हृदयं ब्रह्मवादिनी ॥९

उदरं विश्वभोक्त्री च नाभौ पातु सुरप्रिया ।
जघनं नारसिंही च पृष्ठं ब्रह्माण्डधारिणी ॥१०

पार्श्वौ मे पातु पद्माक्षी गुह्यं गो गोप्त्रिकाऽवतु ।
ऊर्वोरोंकाररूपा च जान्वोः संध्यात्मिकाऽवतु ॥११

जङ्घयोः पातु अक्षोभ्यो गुल्फयोर्ब्रह्मशीर्षका ।
